# नीतिशास्त्रम्

## कक्षा ६

नेपालसर्वकारः

शिक्षाविज्ञानप्रविधिमन्त्रालयः

पाठ्यक्रमविकासकेन्द्रम्

सानोठिमी-भक्तपुरम्

प्रकाशकः
नेपालसर्वकारः
शिक्षाविज्ञानप्रविधिमन्त्रालयः
पाठ्यक्रमविकासकेन्द्रम्
सानोठिमी-भक्तपुरम्

प्रस्तुतपाठ्यपुस्तकसम्बन्धिनः सर्वेऽधिकाराः पाठ्यक्रमविकासकेन्द्रस्य स्वामित्वेऽन्तर्निहितास्सन्ति । लिखितां स्वीकृतिं विनाऽस्य पुस्तकस्य पूर्णभागस्य अथवा एकांशस्य यथावत् प्रकाशनम्, परिवर्त्य प्रकाशनं तथा केनाऽपि वैद्युतेन साधनेन अन्येन प्रविधिना वा यन्त्रप्रयोगेण प्रतिलिपिनिस्सारणञ्च सर्वथा निषिद्धं वर्तते ।

सर्वेऽधिकाराः प्रकाशकाधीनाः

प्रथमसंस्करणम् - २०७८

# अस्मदीयं कथनम्

विद्यालयस्तरीयशिक्षामुद्देश्यप्रधानां व्यावहारिकीं सामयिकीं वृत्तिदायिनीं च विधातुं समये समये पाठ्यक्रम-पाठ्यपुस्तकविकास-परिमार्जनानुकूलनकार्याणि निरन्तरं सञ्चाल्यमानानि सन्ति । विद्यार्थिषु राष्ट्रराष्ट्रियते प्रति सम्मानभावनामुद्भाव्य नैतिकानुशासन-स्वावलम्बनादि-सामाजिक-चारित्रिक-गुणानामाधारभूत-भाषिकशिल्पस्य विकासपूर्वकं सहयोगात्मकस्य दायित्वपूर्णस्य चाऽऽचरणस्य विकासोऽप्यत्वे आवश्यको दृश्यते। अस्या एवावश्यकतायाः परिपूर्तये शिक्षासम्बद्धैर्महानुभावैः सम्मिलितानां गोष्ठीनामन्तःक्रियायाश्च निष्कर्षेण निर्मितं २०७८ तमस्य वैक्रमाब्दस्य पाठ्यक्रममनुसृत्य पुस्तकमिदं निर्मितं वर्तते।शिक्षा विद्यार्थिषु वर्तमानस्य ज्ञानपक्षस्यान्वेषणं विधाय शिक्षणशिल्पेन जीवनस्य सम्बन्धं स्थापयति । शिक्षया विद्यार्थिषु स्वाधिकारस्य, स्वतन्त्रतायाः, समानतायाश्च प्रवर्धनाय, स्वस्थजीवनस्याभ्यासाय, तार्किकविश्लेषणेन निर्णयाय, वैज्ञानिकविश्लेषणेन व्यक्ति-समाज-राष्ट्राणां सबलविकासाय चाग्रेसरणशीलं सामर्थ्यं विकसनीयम् । एवं व्यक्तेः नैतिकाचरणप्रदर्शनाय, सामाजिकसद्भावप्रवर्धनाय, पर्यावरणस्य समुचितप्रयोगशिक्षणाय, दृढशान्तौ प्रतिबद्धतायै च शिक्षायाः आवश्यकता समाजे अवलोक्यते । तेन समाजसापेक्षतया ज्ञान-शिल्प-सूचना-सञ्चार-प्रविधीनां प्रयोगसमर्थाः, स्वावलम्बिनः, व्यावसायिकशिल्पाभ्यासनिरताः, राष्ट्रं राष्ट्रियतां राष्ट्रियादर्शं च प्रति सम्मानविधायकाः, समाज-स्वीकार्याः, सदाचरणशीलाः, स्वसंस्कृति-संस्कारपालनपराः, परसंस्कृत्यादिषु सहिष्णवश्च नागरिकाः शिक्षया निर्मातव्याः । एवं कल्पनाशीलानां रचनाशिल्पिनाम्, नैरन्तरिकपरिश्रमेणोद्यमशीलानाम्, विचारे उदात्तानाम्, व्यवहारे आदर्शमयानाम्, सामयिकसमस्यानां व्यवस्थापने साफल्याधायकानाम्, स्वावलम्बिनाम्, देशभक्तानाम्, परिवर्तनोद्यतानाम्, चिन्तनशीलानाम्, समावेशिसमाजनिर्माणे योगदानं करिष्यमाणानां च नागरिकाणां निर्माणं शिक्षया विधातव्यमिति समाजस्यापेक्षा दृश्यते । इमानेव पक्षान् विचार्य 'राष्ट्रिय-पाठ्यक्रम-प्रारूप, २०७६' इत्यनुसारेण निर्मितस्य ६ कक्षायाः नीतिशास्त्रविषयकपाठ्यक्रमस्याधारेण पाठ्यपुस्तकमिदं विकसितं वर्तते ।

इदं पुस्तकं पर्वतराजः धिमिरे, शिवप्रसादः लामिछाने, गणेशः तिमिल्सिना, पुरुषोत्तमः धिमिरे-प्रभृतीनां महानुभावानां कार्यदलेन लिखितं सम्पादितञ्चास्ति । अस्य पाठ्यपुस्तकस्य लेखने पाठ्यक्रमसिद्धान्तसंरचनयोः नवीनतमधारणामनुसृत्य परम्परागतानां शिल्पानामनुसरणं कृतमस्ति । अस्मिन् कार्ये अस्य केन्द्रस्य महानिर्देशकः अणप्रसादः न्यौपाने, प्रा.डा. नुरापतिः पोखरेलः, सहप्रा. ध्रुवप्रसादः भट्टराई, डा. मुकुन्दप्रसादः लामिछाने, टुकराजः अधिकारी, रोहिणीराजः तिमिल्सिना-प्रभृतीनां महानुभावानां विशेषसहयोगो विद्यते । अस्य चित्राङ्कनं टङ्कणं रूपसज्जा चेत्यादिकं खडोससुनुवार इत्याख्येन महानुभावेन कृतमस्ति ।

पाठ्यपुस्तकं शिक्षणप्रक्रियाया महत्त्वपूर्णसाधनं भवतीति नाविदितं शेमुषीमताम् । सानुभवाः

शिक्षकाः, जिज्ञासवश्छात्राः, सविधिकर्मकराश्च पाठ्यक्रमलक्ष्यीकृतान् विषयान् नैकविधस्रोतसां साधनानाञ्चोपभोगेन अध्यापयितुमध्येतुं कर्म कर्तुं च प्रभवन्ति । अनेकैः कारणैः सर्वेष्वेव विद्यालयेषु सरलतया पाठ्योपकरणानामुपलब्धेरभावाद् अध्ययनकार्यं केवलं पाठ्यपुस्तकाश्रितं भवतीति तथ्यमात्मसात्कृत्य प्रस्तुतमिदं पाठ्यपुस्तकं यथासम्भवं स्तरयुतं विधातुं प्रयासो विहितः, तथापि पाठ्यपुस्तकेऽस्मिन् यत्र यत्र त्रुटयोऽल्पताश्च विदुषां दृष्टिपथमागच्छेयुस्तत्र तत्र परिष्कारे परिवर्धने च दृग्गोचरीभूतानां त्रुटीनां परिमार्जनादिकार्यजाताय परामर्शप्रदानविधौ शिक्षकच्छात्राभिभावकपाठकविशेषज्ञानां महती प्रभावकारिणी भूमिका भवति । अत उक्तविषयेषु रचनात्मकपरामर्शदानेनोपकर्तुं पाठ्यक्रमविकासकेन्द्रमिदं तांस्तान् सर्वानेव महानुभावान् सप्रश्रयमभ्यर्थयते ।

नेपालसर्वकारः

शिक्षाविज्ञानप्रविधिमन्त्रालयः

पाठ्यक्रमविकासकेन्द्रम्

# विषयसूची


| पाठसङ्ख्या | शीर्षकम् | | पृष्ठसङ्ख्या |
|---|---|---|---|
| पाठः १ | गुरुः | आचारपद्यम् | १ |
| पाठः २ | महतां स्वभावः | प्रेरणादायिनी कथा | ६ |
| पाठः ३ | शुभजन्मोत्सवः | संवादः | १२ |
| पाठः ४ | स्मर्तव्यम् | आचारपद्यम् | १९ |
| पाठः ५ | दानशीलता | बोधिसत्त्वकथा | २५ |
| पाठः ६ | चाणक्यः | जीवनवृत्तम् | ३१ |
| पाठः ७ | उदारता | नीतिपद्यम् | ३७ |
| पाठः ८ | समाधानाय प्रवर्तनीयम् | नीतिकथा | ४३ |
| पाठः ९ | चरित्रशक्तिः | प्रबन्धः | ५० |
| पाठः १० | उद्योगमहत्त्वम् | नीतिपाद्यम् | ५६ |
| पाठः ११ | वर्जयेत् दुर्जनं मित्रम् | नीतिकथा | ६३ |
| पाठः १२ | स्वर्गभोगिनः | नीतिपद्यम् | ७२ |
| पाठः १३ | दुःखकारणानि | नीतिपद्यम् | ७९ |
| पाठः १४ | विवेकेन विना विद्या अपूर्णा | नीतिकथा | ८५ |
| पाठः १५ | मित्रस्य सहयोगः | संवादः | ९२ |
| पाठः १६ | यस्य नास्ति स्वयं प्रज्ञा | नीतिकथा | ९९ |
| पाठः १७ | विवेकिता | नीतिपद्यम् | १०६ |
| पाठः १८ | दीनसेवा | प्रबन्धः | ११२ |
| पाठः १९ | पण्डितलक्षणम् | आचारपद्यम् | ११७ |

आचारपद्यम्

# गुरुः

गुरुर्ब्रह्मा गुरुर्विष्णुः गुरुर्देवो महेश्वरः ।
गुरुः साक्षात् परं ब्रह्म तस्मै श्रीगुरवे नमः ॥
अखण्डमण्डलाकारं व्याप्तं येन चराचरम् ।
तत्पदं दर्शितं येन तस्मै श्रीगुरवे नमः ॥
अज्ञानतिमिरान्धस्य ज्ञानाञ्जनशलाकया ।
चक्षुरुन्मीलितं येन तस्मै श्रीगुरवे नमः ॥



**प्रथमः श्लोकः**

**पदच्छेदः**

गुरुः, ब्रह्मा, गुरुः, विष्णुः, गुरुः, देवः, महेश्वरः, गुरुः, साक्षात्, परम्, ब्रह्म, तस्मै, श्रीगुरवे, नमः ।

**सरलार्थः**

गुरुः सृष्टिकर्त्रा ब्रह्मणा समानः अस्ति । गुरुः जगत्पालकेन विष्णुना तुल्यः अस्ति । गुरुः आशुतोषेण महादेवेन समः अस्ति । गुरुः प्रत्यक्षं परमेश्वरः अस्ति । अतः वयं नित्यं गुरुं नमामः ।

**द्वितीयः श्लोकः**

**पदच्छेदः**

अखण्डमण्डलाकारम्, व्याप्तम्, येन, चराचरम्, तत्, पदम्, दर्शितम्, येन, तस्मै, श्रीगुरवे, नमः ।

*शिक्षणालोकः*

*गुरोर्महत्त्वविषयकान् श्लोकान् अन्विष्य अध्येतुं छात्राः प्रेरयितव्याः, गुरुकृपाविषये वर्णिताः पौराणिक्यः कथाः श्रावयितव्याः ।*

**सरलार्थः**

समग्रे अपि ब्रह्माण्डे यः व्याप्तः अस्ति, तादृशस्य भगवतः स्थानं गुरुरेव दर्शयति । अतः वयं नित्यं गुरुं नमामः ।

**तृतीयः श्लोकः**

**पदच्छेदः**

अज्ञानतिमिरान्धस्य, ज्ञानाञ्जनशलाकया, चक्षुः, उन्मीलितम्, येन, तस्मै, श्रीगुरवे, नमः ।

**सरलार्थः**

अज्ञानम् अन्धकारः अस्ति । तेन अन्धकारेण अस्माकं नेत्रे पिहिते स्तः । गुरुः ज्ञानरूपिण्या शलाकया अस्माकं नेत्रे उद्घाटयति । अतः वयं नित्यं गुरुं नमामः ।

## अभ्यासः

### पाठानुशीलनम्

१. **शुद्धम् उच्चारयत**

**ब्रह्मा, साक्षात्, अखण्डमण्डलाकारम्, व्याप्तम्, दर्शितम्, ज्ञानाञ्जनशलाकया, उन्मीलितम् ।**

२. **पाठस्थानां श्लोकानां सस्वरवाचनं कुरुत ।**

३. **पाठस्थं तृतीयं श्लोकं शिक्षकमुखात् श्रुत्वा लिखत ।**

४. **सङ्क्षेपेण उत्तरयत**

(क) कः विष्णुसमानः अस्ति ?

(ख) गुरुः साक्षात् कः अस्ति ?

(ग) कः भगवतः स्थानं दर्शयति ?

(घ) गुरुः ज्ञानेन किम् उद्घाटयति ?

(ङ) वयं नित्यं किं कुर्मः ?

## ५. श्लोकांशान् परस्परं मेलयत

| | |
|---|---|
| गुरुः साक्षात् परं ब्रह्म | गुरुर्देवो महेश्वरः । |
| अखण्डमण्डलाकारम् | ज्ञानाञ्जनशलाकया । |
| अज्ञानतिमिरान्धस्य | तस्मै श्रीगुरवे नमः । |
| गुरुर्ब्रह्मा गुरुर्विष्णुः | व्याप्तं येन चराचरम् । |
| | चक्षुरुन्मीलितं येन । |

## ६. अधस्तनानि पदानि प्रयुज्य वाक्यानि रचयत

**ब्रह्मा, साक्षात्, गुरवे, व्याप्तम्, दर्शितम्, शलाकया, चक्षुः, नमः ।**

## ७. लघुकथां पठित्वा प्रश्नान् उत्तरयत



एकस्मिन् वने एकः सरोवर आसीत् । सरोवरस्य निकटे कच्छपः शशकश्च निवसतः स्म । एकदा तयोः मध्ये विवादः अभवत् । कच्छपः अवदत्, "अहं शीघ्रं चलामि ।" शशकः च अवदत्, "अहं शीघ्रं चलामि ।" इति । तदा तयोः मध्ये प्रतियोगिता अभवत् । प्रतियोगिता च प्रारब्धा ।

शशकः शीघ्रं दूरस्थम् एकं वृक्षं लक्ष्यं मत्वा अधावत् । अर्धं मार्गं पारं कृत्वा शशकः पृष्ठभागे शनैः शनैः चलन्तम् अतिदूरस्थं कच्छपमपश्यत्, अचिन्तयत् च, "अतिशीघ्रं लक्ष्यं प्राप्य किं भवति ? मम विजयस्तु सुनिश्चित एव । क्षणमत्रैव विश्रम्य धाविष्यामि ।" एवं विचिन्त्य शशकः तत्रैव सुप्तवान् । परन्तु कच्छपः विश्रामं विना निरन्तरं चलित्वा स्वलक्ष्यं प्राप्तवान् । परिश्रमी कच्छपः विजयी अभवत्, अलसः शशकश्च पराजितः ।

**(अ) एकपदेन उत्तरयत**

(क) प्रतियोगिता कयोः मध्ये आसीत् ?

(ख) सरोवरः कुत्र आसीत् ?

**(आ) पूर्णवाक्येन उत्तरयत**

(क) शशकः किं विचिन्त्य मार्गमध्ये सुप्तवान् ?

(ख) शशकः कीदृशः आसीत् ?

**८. उचितपदेन रिक्तस्थानं पूरयत**

**ईश्वरः, समः, अन्धकारः, नित्यम्, स्थानम्**

(क) गुरुः महादेवेन ............... अस्ति ।

(ख) समस्ते ब्रह्माण्डे ................ व्याप्तः अस्ति ।

(ग) गुरुः भगवतः ............ दर्शयति ।

(घ) अज्ञानम् .................. अस्ति ।

(ङ) वयं ............. गुरुं नमामः ।

**९. अधस्तनं श्लोकं दृष्ट्वा विद्यार्थिनां स्वभावविषये एकम् अनुच्छेदं लिखत**

**सुखार्थी चेत् त्यजेद् विद्यां विद्यार्थी चेत् त्यजेत् सुखम् ।**
**सुखार्थिनः कुतो विद्या विद्यार्थिनः कुतः सुखम् ॥**

**१०. पाठस्थश्लोकान् आधृत्य गुरोः महत्त्वं लिखत ।**

**११. सरलार्थं विलिख्य कक्षायां श्रावयत**

**वृद्धानां वचनं श्रुत्वा योऽभ्युत्थानं प्रयोजयेत् ।**
**उत्थानस्य फलं सम्यक् तदा स लभतेऽचिरम् ॥**

**१२. श्लोकं पठित्वा प्रश्नान् उत्तरयत**

**आचिनोति च शास्त्राणि ह्याचारे स्थापयत्यपि ।**
**स्वयमाचरते यस्मात् तस्मादाचार्य उच्यते ॥**

(क) आचार्यः कानि आचिनोति ?

(ख) कः आचारे स्थापयति ?

(ग) कः स्वयम् आचरणम् आचरते ?

(घ) मनुष्यः कथम् आचार्यः भवति ?

१३. **मञ्जूषायाः सहयोगेन चित्रवर्णनं कुरुत**

**गुरुः, विराजितः, छात्रः, आशीर्वादम्, छात्राय, आसने, अस्ति, प्रणमति, ददाति**

## व्यवहारानुशीलनम्

१. **त्वं किमर्थं गुरोः सम्मानं करोषि ? कक्षायां स्वमतम् उपस्थापय ।**

२. **गुरुणा निर्दिष्टं कार्यं कृत्वा त्वया कः लाभः प्राप्तः ? मित्रैः सह कथय ।**

३. **दत्तात्रेयस्य चतुर्विंशतिः गुरवः आसन् । अतः वयं जीवने यस्मात् कस्माद् अपि शिक्षाम् अर्जयितुं शक्नुमः । अनया रीत्या प्रदत्तानां प्रश्नानां समुचिते उत्तरे चिह्नं (√) दत्त**

(क) त्वं मधुमक्षिकातः कां शिक्षां गृहणासि ?

(अ) कार्यगताम् एकताम् (आ) विखण्डनम् (इ) उड्डयनम्

(ख) त्वं पिपीलिकातः कां शिक्षां गृहणासि ?

(अ) कलहम् (आ) परिश्रमस्य निरन्तरताम् (इ) दशनम्

(ग) त्वं पृथ्वीतः कां शिक्षां गृहणासि ?

(अ) सहनशीलताम् (आ) विचलनम् (इ) प्राणिनां धारणम्

(घ) त्वं पर्वतात् कां शिक्षां गृहणासि ?


(अ) स्थिरताम् (आ) कठोरताम् (इ) लम्बताम्

# पाठः २

प्रेरणादायिनी कथा

## महतां स्वभावः

कस्मिँश्चित् समये स्वामी रामतीर्थः छात्रान् अध्यापयति स्म । स कुशलः शिक्षकः आसीत् । विभिन्नानां दृष्टान्तानां माध्यमेन स छात्रेभ्यः जीवनोपयोगिनीं शिक्षां यच्छति स्म ।



एकदा रामतीर्थः कक्षायां प्रविश्य श्यामपट्टे एकां रेखां कृतवान् । अनन्तरं स छात्रान् "इमां रेखां लघ्वीं कर्तुं कः शक्नोति ?" इति प्रश्नं पृष्टवान् । सर्वे छात्राः "अहं शक्नोमि, अहं शक्नोमि" इति कथयन्तः हस्तम् उपरि कृतवन्तः । रामतीर्थः एकं छात्रम् अग्रे आहूतवान् । तं स रेखां लघ्वीं कर्तुम् आदिष्टवान् । छात्रः सम्मार्जिकां गृहीत्वा रेखायाः स्वल्पम् अंशं सम्मार्जयितुम् आरब्धवान् । रामतीर्थः तं निषिध्य कथितवान्, "भो छात्र ! अहम् रेखां लघ्वीं कर्तुम् आदिष्टवान् आसम्, न तु सम्मार्जयितुम् । अतः त्वं सम्मार्जनेन विना एव रेखां लघ्वीं कुरु" इति । एवं श्रुत्वा स छात्रः, अन्ये च छात्राः चकिताः सञ्जाताः । रामतीर्थः पुनः कथितवान्, "सम्मार्जनेन विना एव रेखां लघ्वीं कर्तुं

*शिक्षणालोकः*

*विश्वप्रसिद्धानां साधूनां विषये पठित्वा प्रेरणादायिनीः घटनाः श्रावयितुं छात्राः प्रेरयितव्याः ।*

कः शक्नोति ? यः शक्नोति सः अग्रे आगच्छतु" इति । रामतीर्थस्य एतद् वचनं श्रुत्वा एकः अपि छात्रः अग्रे न आगतवान् । किञ्चित् क्षणं प्रतीक्ष्य रामतीर्थः "कः अपि न शक्नोति चेद् अहमेव करोमि" इति कथयन् श्यामपट्टे ततः अपि महतीम् अन्यां रेखां कृतवान् । महत्याः रेखायाः अपेक्षया पूर्वतनी रेखा स्वयमेव लघ्वी सञ्जाता ।

अनन्तरं छात्रान् सम्बोधयन् रामतीर्थः कथितवान्, "पश्यन्तु, अहं पूर्वतनीं रेखां लघ्वीं कर्तुं ततः अपि महतीम् अपरां रेखां कृतवान् । तथैव जीवने महान् भवितुम् अन्येभ्यो महत् कार्यं कर्तव्यम् । यः महत् कार्यं करोति सः स्वतः एव महान् भवति । अन्यान् पीडयित्वा, विनाश्य च यः महान् भवितुम् इच्छति, वस्तुतः स कदापि महान् न भवति । अतः यः सदा परिश्रमेण, निष्ठया च कार्यं करोति, स महान् भवति ।" रामतीर्थस्य एतत् कथनं श्रुत्वा सर्वे छात्राः सन्तुष्टाः सञ्जाताः ।

## अभ्यासः

### पाठानुशीलनम्

१. **पाठस्य द्वितीयानुच्छेदस्य सस्वरपठनं कुरुत ।**

२. **शुद्धमुच्चारयत**

**कस्मिँश्चित्, दृष्टान्तानाम्, श्यामपट्टे, सम्मार्जिकाम्, निषिध्य, लघ्वीम्, महतीम्, कर्तव्यम्, पीडयित्वा ।**

३. **एकपदेन उत्तरयत**

(क) रामतीर्थः कीदृशः गुरुः आसीत् ?

(ख) कः श्यामपट्टे रेखां कृतवान् ?

(ग) केन विना रेखा लघ्वी कर्तव्या आसीत् ?

(घ) महत्याः रेखायाः अपेक्षया पूर्वतनी रेखा कीदृशी सञ्जाता ?

(ङ) जीवने महान् भवितुं महत् किं कर्तव्यम् ?

(च) कस्य कथनं श्रुत्वा छात्राः सन्तुष्टाः जाताः ?

४. **एकवाक्येन उत्तराणि लिखत**

(क) रामतीर्थः कथं शिक्षां यच्छति स्म ?

(ख) रामतीर्थः किं पृष्टवान् ?

(ग) छात्रः सम्मार्जिकां गृहीत्वा किं कर्तुम् आरब्धवान् ?

(घ) कः महान् न भवति ?

(ङ) कः महान् भवति ?

**५. समीचीनकथने 'आम्', असमीचीनकथने 'न' इति लिखत**

(क) रामतीर्थः वृद्धान् पाठयति स्म ।

(ख) एकः छात्रः रामतीर्थम् अग्रे आहूतवान् ।

(ग) रामतीर्थः पुनः 'कः सम्मार्जनीं विना रेखां लघ्वीं कर्तुं शक्नोति ?' इति पृष्टवान् ।

(घ) रामतीर्थः रेखां लघ्वीं कर्तुम् असमर्थः अभवत् ।

(ङ) यः परिश्रमपूर्वकं कार्यं करोति सः महान् भवति ।

**६. पाठस्य सन्देशं स्ववाक्यैः लिखत ।**

**७. उचितमेलनं कुरुत**

| | |
|---|---|
| (क) जीवनोपयोगिनी | कार्यम् |
| (ख) स्वल्पः | शिक्षा |
| (ग) पूर्वतनी | छात्राः |
| (घ) महत् | रेखा |
| (ङ) सन्तुष्टाः | अंशः |
| | हस्तः |

**८. शुद्धं कुरुत**

**स्वामि, उपरी, गृहित्वा, सन्जाताः, आदिश्टवान्, कथयितवान्**

**९. अधस्तनानि पदानि प्रयुज्य वाक्यानि रचयत**

**माध्यमेन, सम्मार्जिका, आसम्, प्रतीक्ष्य, महत्याः, विनाश्य, महान्**

## १०. अधोलिखितां लघुकथां पठित्वा शीर्षकं दत्त

एकदा एकस्मिन् वने चतुरः अजः चरन् आसीत् । स घासं खादन् वनस्य अन्तः प्राविशत् । तत्र बुभुक्षया पीडितः एकः वृकः भ्रमन् आगतवान् । अजं दृष्ट्वा हर्षितः सः अजस्य समीपम् अगच्छत् । यदा अजः वृकम् अपश्यत्, तदा एव उपायं च अचिन्तयत् । स पादम् अधः कृत्वा रोदितुं प्रारभत, वृकं प्रति च अवदत्, "भो अग्रज ! मम पादः कण्टकेन विद्धः अस्ति । अतः यावद् अहं कण्टकं निष्कासयामि, तावत् त्वं प्रतीक्षस्व ।" ततः वृकः उषित्वा अजस्य पादं द्रष्टुम् आरब्धवान् । उचितं समयं विलोक्य पादेन अजः तस्य मुखे प्राहरत् । तेन वृकस्य दन्ताः भूमौ पतिताः, अजः च पलायितः ।

## ११. अधस्तनं गद्यांशं पठित्वा प्रदत्तान् प्रश्नान् उत्तरयत



एकः बालकः अध्ययनार्थं गुरुकुलं गतः आसीत् । गुरुकुले अन्ये बहवः छात्राः अपि आसन् । ते सदा एव पाठं श्रावयन्ति स्म परं स बालकः पाठं श्रावयितुं न शक्नोति स्म । सखायः तस्य उपहासं कुर्वन्ति स्म । एतेन दुःखितः स एकदा गुरुकुलात् पलायितवान् । मार्गे स तृषार्तः अभवत् । स परिवापं प्रति अगच्छत् । तत्र महिलाः घटेषु जलं भरन्त्यः आसन् । स ताः अनुरुध्य हस्ताभ्यां जलम् अपिबत् । जलपानसमये स शिलायां कुकूलम् अपश्यत् ।

कुकूलं जलपातस्थाने आसीत् । सः अपृच्छत्, "शिलायां कथं कुकूलं जातम् ?" काचिद् महिला अकथयत्, "निरन्तरं जलपातेन अस्यां शिलायां कुकूलं जातम् ।" एतत् श्रुत्वा सः अचिन्तयत्, "निरन्तरं जलपातेन कठोरतमायां शिलायाम् अपि कुकूलं जायते चेत् निरन्तरम् अध्ययनेन अहं कथं पाठं श्रावयितुं न शक्नुयाम् ?" ततः स गुरुकुलं प्रत्यागच्छत् । महान् नैयायिकः गङ्गेशोपाध्यायः स एव बालकः आसीद् इति प्रसिद्धिः अस्ति ।

**प्रश्नाः**

(क) बालकः किमर्थं गुरुकुलं गतः आसीत् ?

(ख) सखायः तस्य बालकस्य किमर्थम् उपहासं कुर्वन्ति स्म ?

(ग) तृषार्तः बालकः शिलायां किम् अपश्यत् ?

(घ) शिलायां कुकूलं कथं जातम् ?

(ङ) महिलायाः कथनं श्रुत्वा बालकः किम् अचिन्तयत् ?

**१२. संवादं पठित्वा प्रश्नान् उत्तरयत**

रूपेशः - महाशय ! भवान् किं करोति ?

लक्ष्मीनाथः - अत्र अहं रसालस्य वृक्षं वपामि ।

रूपेशः - अस्मिन् वृक्षे रसालफलानि कदा फलिष्यन्ति ?

लक्ष्मीनाथः - दशभ्यः वर्षेभ्यः अनन्तरम् ।

रूपेशः - तर्हि भवान् व्यर्थं कार्यं करोति । भवान् तु वृद्धः अस्ति । यदा फलानि फलिष्यन्ति तदा भवतः जीवनं भविष्यति न वा ?

लक्ष्मीनाथः - अहं फलोत्पत्तिं यावत् जीविष्यामि न वेति न जानामि । यदि अहं जीवितः न भवेयम्, तर्हि अपि चिन्ता नास्ति । मया आरोपितस्य वृक्षस्य फलानि अन्ये खादिष्यन्ति । उपकारस्य कार्यमेतत्, सत्कार्यम् अस्ति ।

रूपेशः - एवम् ! सत्कार्यार्थं कृतः श्रमः कदापि व्यर्थो न भवति । भवान् धन्यः अस्ति । अहमपि अद्यैव सत्कार्यार्थं कार्यं प्रारभे ।

**(अ) एकपदेन उत्तरयत**

(क) वृद्धः लक्ष्मीनाथः किं वपति ?

(ख) रसालफलानि कदा फलिष्यन्ति ?

**(आ) पूर्णवाक्येन उत्तरयत**

(क) लक्ष्मीनाथस्य वृक्षवपनं कीदृशं कार्यम् अस्ति ?

(ख) रूपेशः किमर्थं कार्यं प्रारभते ?

## व्यवहारानुशीलनम्

**१. पाठस्य कथायाः आशयं ज्ञात्वा 'महान् भवितुं किं कर्तव्यम् ?' इति विषये मित्रैः सह विमर्शनं कुरुत ।**

**२. त्वं स्वस्य कान् व्यवहारान् परिवर्तितुम् इच्छसि ? सकारणं श्रावय ।**

**३. समुचिते विकल्पे चिह्नं (√) दत्त**

(क) मार्गे मान्याः मिलन्ति चेत् किं करोषि ?

(अ) दूरं गच्छामि । (आ) समीपं गत्वा नमस्करोमि । (इ) अपरिज्ञाय चलामि ।

(ख) चत्वरे अवकरं दृष्ट्वा किं करोषि ?

(अ) अवकरपात्रे क्षिपामि । (आ) दृष्ट्वा एव गच्छामि । (इ) चरणेन प्रहरामि ।

(ग) दृष्टिविहीनः मार्गात् पारं गन्तुम् इच्छति चेत् त्वं किं करोषि ?

(अ) पारं नयामि । (आ) किमपि न करोमि । (इ) तत्र स्थित्वा पश्यामि ।

(घ) चत्वरे क्रीडनानन्तरं किं करोषि ?

(अ) शय्यायां स्वपिमि । (आ) हस्तौ पादौ च प्रक्षालयामि । (इ) चत्वरं खनामि ।

# पाठः ३

संवादः

## शुभजन्मोत्सवः

(विनोदः विजयश्च सखायौ स्तः । तौ ग्रामस्य निकटस्थे विद्यालये षष्ठ्यां कक्षायां पठतः । तौ कक्षायाः उत्तमौ छात्रौ स्तः । एकदा प्रातरेव विनोदः मार्गे चलति । तेन सह विजयस्य मेलनं भवति । तौ संवदतः ।)

विजयः - विनोद ! कुत्र गच्छसि प्रातरेव ? अस्ति किमपि विशेषं कार्यम् ?

विनोदः - विशेषं तु नास्ति । मन्दिरं गच्छन् अस्मि ।

विजयः - अद्य कः अपि पर्वदिवसः अस्ति किम् ?

विनोदः - पर्वदिवसस्तु नास्ति । अद्य मम शुभजन्मोत्सवः वर्तते । भगवतः दर्शनाय इच्छुकः अस्मि । मन्दिरं गत्वा दर्शनं करोमि ।



विजयः - भगवतः दर्शनस्य किं प्रयोजनम् ? मन्दिरम् अगत्वा भगवतः दर्शनं च अकृत्वा जन्मोत्सवः सम्पन्नः न भवति ?

***शिक्षणालोकः***

*छात्राः सरलं मितव्ययि च जीवनं यापयितुं प्रेरणीयाः । स्वसंस्कृतिम् अनुसृत्य चलितुमपि ते निर्देष्टव्याः ।*

विनोदः - अवश्यं सम्पन्नः भवति परं सुख-सन्तोषाऽऽरोग्यादिसम्पदां प्राप्तये जनाः मन्दिरं गच्छन्ति । भगवतः दर्शनं विदधति । ते शान्तिं कल्याणं च प्राप्नुवन्ति । इत्थं विश्वस्य अहमपि तत्र गच्छन् अस्मि । भगवतः कृपया सुखं मिलतीति विश्वसिमि ।

विजयः - शोभनम् उक्तम् विनोद ! अन्यानि कानि कार्याणि क्रियन्ते शुभजन्मोत्सवे ? तदपि कथय ।

विनोदः - बहूनि कार्याणि सन्ति विजय ! सत्कार्यं प्रारभ्य, दीनेभ्यः किञ्चिद् वस्तु प्रदाय, परोपकारिणीभ्यः संस्थाभ्यः यथाक्षमं सहयोगं समर्प्य च उत्सवमिमम् कर्तुं शक्यते ।

विजयः - इमानि कार्याणि शुभजन्मोत्सवे एव कर्तुं शक्यन्ते ? अन्येषु दिनेषु इमानि सम्भवन्ति न वा ?

विनोदः - तथा न । एतादृशानि कार्याणि अन्येषु दिवसेषु अपि सम्भवन्ति । जनाः सदैव इत्थं कर्तुं शक्नुवन्ति परं शुभजन्मोत्सवे अपि एतानि कार्याणि शोभन्ते इति मम विचारः ।

विजयः - अपूपकर्तनं दीपनिर्वापणं च न करोषि विनोद ?

विनोदः - तत्तु न करोमि । इयम् अस्माकं परम्परा नास्ति ।

विजयः - जनाः इत्थं कृत्वापि शुभजन्मोत्सवं कुर्वन्ति । केचन तु अपूपं कर्तित्वा दीपान् निर्वाप्य च तालवादनं कुर्वन्ति । प्रसन्नमनसा खादन्ति, पिबन्ति, गायन्ति, नृत्यन्ति च । कार्यमेतत् शुभजन्मोत्सवे न कर्तव्यं किम् ?

विनोदः - सत्यं वदसि । कतिचित् जनाः एवमेव कृत्वा शुभजन्मोत्सवं समायोजयन्ति । एतत् तेषां रुचेः विषयः वर्तते । नागरजीवनस्य अनुकरणेन पाश्चात्त्यसंस्कृतेः प्रभावेण च एतत् प्रचलितम् । परम् अस्माकं मौलिकसंस्कृतौ एतादृशी प्रथा कुत्रापि प्रचलिता नासीत् ।

विजयः - तव कथनं मह्यम् अतीव अरोचत । त्वम् अद्य प्रातः किं कृतवान् ?

विनोदः - प्रातः अपि सूर्योदयात् प्रागेव उत्थाय नित्यकर्म समाप्य च स्नानम् कृतवान् । स्तोत्राणि च पठितवान् । अष्टचिरञ्जीविनां पूजनं विधाय पित्रोः आशीर्वादम् आप्तवान् । इष्टदेवताः कुलदेवताः च प्रणम्य बहिः निष्क्रान्तः अस्मि ।

विजयः - अद्य अन्यत् किं करोषि विनोद ?

विनोदः - सायं भगवतः भजन-कीर्तन-स्मरणादीनि कार्याणि विधाय एव स्वपिमि । मनः सत्कर्मणि नियोजयामि । मनसः दुर्वृत्तिं निष्काशयितुं यत्नं करोमि ।

विजयः - शुभजन्मोत्सवे न केवलं शारीरिकाणि एव, मानसिकानि अपि कार्याणि शोधनीयानि भवन्ति । तत् वक्तुम् इच्छसि विनोद ?

विनोदः - तदेव वच्मि । शरीरस्य सत्कर्मणा मनसः सद्भावेन च समायोजितः शुभजन्मोत्सवः सार्थकः भवति । स्वसंस्कृतेः परम्परायाश्च अनुसरणेन दिवसोऽयं भव्यः कार्यः । परेषाम् अनुकरणेन कस्मै अपि कः अपि लाभः न भवति । एवं कृते वयं कर्मणा विचारेण च पराधीनाः भवामः ।

विजयः - सद्वचनं वदसि विनोद । त्वं सन्मित्रम् असि । यः हितं वक्ति स एव सन्मित्रं भवति । तव वचनम् अनुसृत्य चलामि । मासस्य अभ्यन्तरे मम अपि शुभजन्मोत्सवः आगमिष्यति । अद्य त्वं यथा कृतवान्, अहमपि तदा तथैव करिष्यामि । मम शुभजन्मोत्सवः अस्मदीयया रीत्या एव समायोक्ष्यते ।

विनोदः - शोभनः विचारः । अधुना विलम्बः जायमानः अस्ति । गच्छाव ।

विजयः - अस्तु, गच्छाव । पुनः मेलिष्यावः ।

(विनोदः मन्दिरं गच्छति, विजयः च गृहं गच्छति ।)

## अभ्यासः

### पाठानुशीलनम्

**१. एकवाक्येन उत्तरयत**

(क) विनोदः कुत्र गच्छन् अस्ति ?

(ख) जनाः किमर्थं मन्दिरं गच्छन्ति ?

(ग) विनोदः किं विश्वसिति ?

(घ) जनाः कदा तालवादनं कुर्वन्ति ?

(ङ) विनोदः सूर्योदयात् प्राक् किं कृतवान् ?

(च) कीदृशः शुभजन्मोत्सवः सार्थकः भवति ?

(छ) शुभजन्मोत्सवः कथं भव्यः कार्यः ?

(ज) कः सन्मित्रं कथ्यते ?

(झ) शुभजन्मोत्सवः कया रीत्या समायोजनीयः ?

२. **कथयितुर्नाम कोष्ठके लिखत**

(क) किमर्थं मन्दिरं गच्छसि ? ( )

(ख) भगवतः दर्शनाय इच्छुकः अस्मि । ( )

(ग) भगवतः कृपया सुखं मिलतीति विश्वसिमि । ( )

(घ) अपूपकर्तनं दीपनिर्वापणं च न करोषि ? ( )

(ङ) एतत् तेषां रुचेः विषयः वर्तते । ( )

(च) तव कथनं मह्यम् अतीव रोचते । ( )

(छ) मनः सत्कर्मणि नियोजयामि । ( )

(ज) त्वं सन्मित्रम् असि । ( )

(झ) मम शुभजन्मोत्सवः अत्मदीयया रीत्या एव समायोक्ष्यते । ( )

३. **पाठं सस्वरं साभिनयं च पठत ।**

४. **पाठस्य अनुलेखनं कुरुत ।**

५. **अनुच्छेदं पठित्वा सन्देशं कथयत**

वेदस्य प्रामाण्यम् अनुसरन्ति षड् दर्शनानि सन्ति । एतेषां समूहः षड्दर्शनम् उच्यते । षड्दर्शनम् आस्तिकदर्शननाम्ना प्रसिद्धमस्ति । एतेषु अन्यतमं मीमांसादर्शनं वर्तते । मीमांसादर्शनस्य द्वौ भागौ स्तः - पूर्वमीमांसा उत्तरमीमांसा च । पूर्वमीमांसा कर्ममीमांसा धर्ममीमांसा वा कथ्यते । उत्तरमीमांसा ज्ञानमीमांसा ब्रह्ममीमांसा वा निगद्यते । पूर्वमीमांसा केवलं मीमांसानाम्ना बुध्यते । उत्तरमीमांसायाः अपरं नाम वेदान्तदर्शनमिति प्रसिद्धं वर्तते । सप्तमशताब्द्यां पूर्वमीमांसादर्शनस्य द्वौ प्रसिद्धौ विद्वांसौ अभवताम् - कुमारिलभट्टः, प्रभाकरमिश्रश्च । कुमारिलः गुरुः प्रभाकरश्च शिष्यः आस्ताम् । तयोर्मध्ये भूयोभूयः शास्त्रार्थः भवति स्म । प्रभाकरः बलिष्ठान् तर्कान् उपस्थाप्य गुरुमतं खण्डयति स्म । तस्मिन् क्रमे गुरुः कुमारिलः पराजितः । तदनन्तरं प्रभाकरस्य मतं गुरुमतस्य रूपेण प्रसिद्धम् अभवत् । कुमारिलस्य मतं च भाट्टमतमिति नाम्ना स्थापितम् । ज्ञानेन, विद्यया तर्केण च गुरौ विजयस्य एतत् प्रेरकम् उदाहरणं मन्यते । सत्यमेव उक्तम् -

सर्वत्र जयमन्विच्छेत् शिष्यादिच्छेत् पराजयम् ।

## ६. असत्यकथनं संशोध्य पुनर्लिखत

(क) विनोदः विजयश्च नगरस्य विद्यालये पठतः ।

(ख) सुख-सन्तोषाऽऽरोग्याणि कः अपि नेच्छति ।

(ग) शुभजन्मोत्सवे सत्कार्यं प्रारब्धुं न शक्यते ।

(घ) दानं शुभजन्मोत्सवे एव दीयते ।

(ङ) नागरजीवनस्य अनुकरणं सदैव उचितं भवति ।

(च) दुर्वृत्तिं मनसः निष्काशयितुं नैव प्रयतनीयम् ?

(छ) सन्मित्रम् अप्रियवचनं वदति ।

(ज) शुभजन्मोत्सवस्य आयोजनं व्ययसाध्यं भवति ।

## ७. शुद्धं रूपं प्रयुज्य वाक्यं रचयत

**मिलनम्, पर्वदिवशः, सम्पदानाम्, विस्वसिमी, दिपनिर्वापनम्, सिस्करणम्, एतादृसी, दुर्बृत्तिम्, नीयोजयामी, परेसाम्, अनूसृत्य ।**

## ८. परस्परं मेलयत

| **'अ' खण्डः** | **'आ' खण्डः** |
|---|---|
| (क) उत्तमौ | (क) कार्याणि |
| (ख) बहूनि | (ख) विश्वसिमि |
| (ग) परोपकारिणीभ्यः | (ग) शोधनीयानि |
| (घ) अहम् | (घ) रोचते |
| (ङ) कार्याणि | (ङ) छात्रौ |
| (च) मह्यम् | (च) गच्छसि |
| | (छ) संस्थाभ्यः |

९. शिक्षकस्य सहयोगेन पाठस्य सारांशं कथयत ।

१०. पदविच्छेदं कृत्वा शुद्धमुच्चारयत

प्रातरेव, पर्वदिवसस्तु, कृत्वापि, प्रागेव, सन्मित्रम्, तदेव ।

११. उचितं पदं चित्वा संवादं पूरयत

**कुतः, हस्ते, कुशली, त्यज, धूमः, ग्रस्तः, हानिः, गच्छाव, करोमि**

रमणः अयि सुजन, ............... असि ?

सुजनः अस्मि । भवान् ............ आगच्छन् अस्ति ?

रमणः कार्यालयात् । तव .......... किम् अस्ति भो ?

सुजनः नास्ति, किमपि ।

रमणः ........ आगच्छन् अस्ति । धूमपानं करोषि ? शीघ्रं ....... ।

सुजनः क्षम्यतां भ्रातः ।

रमणः स्वास्थ्ये ......... जायते एतेन । हृदः रोगेण ......... भवसि ।

सुजनः इतः परं न ............... ।

रमणः समीचीनम् । ........... ।

१२. अद्यो लिखितेषु यथेच्छं कस्यापि युगलस्य अतिसङ्क्षिप्तं संवादं लिखत

| युगलम्- १ | युगलम्- २ | युगलम्- ३ | युगलम्- ४ |
|---|---|---|---|
| गुरुच्छात्रौ | रोगि-चिकित्सकौ | पति-पत्न्यौ | राज-सेवकौ |

१३. श्लोकयोः सरलार्थं पठित्वा सखिभिः सह विमृशत

त्यक्त्वा प्राणांश्च ये वीरा रणे वीराङ्गना पुरा ।

देशं संरक्ष्य पञ्चत्वं गताश्च जीविता इव ॥

**सरलार्थः**

प्राचीनकाले शत्रवः अस्माकं देशे आक्रमणं कृतवन्तः । तदा वीराः वीराङ्गनाः च देशं

रक्षितवन्तः । देशस्य रक्षणाय युध्यमानाः ते स्वस्य प्राणान् अपि अत्यजन् । ते देशं संरक्ष्य एव मृताः । अतः ते मृताः अपि कार्येण नाम्ना च जीविताः सन्ति । मृत्वा अपि ते अस्माकं स्मृतौ सदैव जीविताः सन्ति ।

बिलाद् बहिर्बिलस्यान्तः स्थितमार्जारसर्पयोः ।

मध्ये चाखुरिवाभाति पत्नीद्वययुतो नरः ॥

**सरलार्थः**

यस्य द्वे पत्न्यौ भवतः स अतीव दुःखं प्राप्नोति । स तु अन्तर्भागे सर्पस्य बहिर्भागे च बिडालस्य वासयुतस्य बिलस्य मध्यभागे अवस्थितः मूषकः इव किङ्कर्तव्यविमूढः भवति ।

## व्यवहारानुशीलनम्

**१. स्वस्य शुभजन्मोत्सवस्य कार्यक्रमाणां सूचीं निर्माय कक्षायां प्रदर्शयत ।**

**२. स्वस्य अभिभावकस्य शुभजन्मोत्सवविधिं श्रावयत ।**

**३. कस्यापि जनस्य शुभजन्मोत्सवस्य सहभागितायाः अवसरे विहितानाम् उचितानाम् अनुचितानां वा कार्याणां पृथक् पृथक् सूचीं निर्माय सखिभिः सह विमृशत ।**

**४. समुचिते विकल्पे चिह्नं (√) दत्त**

(क) जन्मोत्सवे प्रातः कुत्र गच्छसि ?

(अ) देवमन्दिरम् (आ) चलचित्रमन्दिरम् (इ) विद्यामन्दिरम्

(ख) जन्मोत्सवे केषां पूजनं करोषि ?

(अ) वृक्षाणाम् (आ) नदीनाम् (इ) अष्टचिरञ्जीविनाम्

(ग) जन्मोत्सवे किं खादसि ?

(अ) अपूपम् (आ) मोदकम् (इ) चाकलेहम्

(घ) जन्मोत्सवस्य पूजायां किं प्रज्वालयसि ?

(अ) गोलदीपम् (आ) दण्डदीपम् (इ) तैलदीपम्

आचारपद्यम्

# स्मर्तव्यम्

धर्मार्थौ यः परित्यज्य स्यादिन्द्रियवशानुगः ।
श्रीप्राणधनदारेभ्यः क्षिप्रं स परिहीयते ॥
पापं कुर्वन् पापकीर्तिः पापमेवाश्नुते फलम् ।
पुण्यं कुर्वन् पुण्यकीर्तिः पुण्यमत्यन्तमश्नुते ॥
वृत्तं यत्नेन संरक्षेद् वित्तमेति च याति च ।
अक्षीणो वित्ततः क्षीणो वृत्ततस्तु हतो हतः ॥

**प्रथमः श्लोकः**

**पदच्छेदः**

धर्मार्थौ, यः, परित्यज्य, स्यात्, इन्द्रियवशानुगः, श्रीप्राणधनदारेभ्यः, क्षिप्रम्, सः, परिहीयते ।

**सरलार्थः**

यः कः अपि दुष्टमतिः मनुष्यः इन्द्रियाणाम् अधीनस्थो भूत्वा धर्मम्, अर्थं च त्यजति, सः सम्पत्त्या, प्राणैः, धनेन, पत्न्या च शीघ्रमेव त्यज्यते ।

**द्वितीयः श्लोकः**

**पदच्छेदः**

पापम्, कुर्वन्, पापकीर्तिः, पापम्, एव, अश्नुते, फलम्, पुण्यम्, कुर्वन्, पुण्यकीर्तिः, पुण्यम्, अत्यन्तम्, अश्नुते ।

*शिक्षणालोकः*

*जीवने साफल्यं प्राप्तुं स्मरणीयानां सूक्तीनां सङ्कलनाय छात्राः प्रेरयितव्याः, सूक्तीनाम् अर्थबोधनं च शिक्षकेण कारयितव्यम् ।*

**सरलार्थः**

यः कुकृत्यं करोति, अनुचितं कर्म कृत्वा यः कुख्यातः भवति, स तस्य कर्मणः फलरूपेण दुःखम् एव प्राप्नोति, परन्तु यः सुकृतं करोति, यस्य नाम च पुण्यकर्मणा विख्यातं वर्तते, स परिणामे सुखम् एव प्राप्नोति ।

### तृतीयः श्लोकः

**पदच्छेदः**

वृत्तम्, यत्नेन, संरक्षेत्, वित्तम्, एति, च, याति, च, अक्षीणः, वित्ततः, क्षीणः, वृत्ततः, तु, हतः, हतः ।

**सरलार्थः**

चरित्रं मनुष्यस्य प्रमुखं धनम् अस्ति । अतः अस्य संरक्षणे प्रयतनीयम् । धनं तु कदाचित् आगच्छति, कदाचित् च गच्छति । धनस्य क्षये किमपि न भवति । यदि मनुष्यः चरित्रेण हीनः भवति तर्हि तस्य सर्वं विनष्टं मन्यते ।

## अभ्यासः

### पाठानुशीलनम्

१. **शुद्धमुच्चारयत**

**परित्यज्य, इन्द्रियवशानुगः, श्रीप्राणधनदारेभ्यः, क्षिप्रम्, पापकीर्तिः, अश्नुते, पुण्यम्, वृत्तम्, अक्षीणः ।**

२. **त्रीन् एव श्लोकान् शुद्धं श्रावयत ।**

३. **एकपदेन उत्तरयत**

(क) कः धर्मार्थौ परित्यजति ?

(ख) मन्दमतिः केषां वशे भवति ?

(ग) पापकीर्तिः किं फलम् अश्नुते ?

(घ) वृत्तं कथं संरक्षणीयम् ?

४. **एकवाक्येन उत्तरयत**

(क) कः श्रीप्राणधनदारेभ्यः परिहीयते ?

(ख) कीदृशः मनुष्यः पापं फलं प्राप्नोति ?

(ग) पुण्यार्थं किं कर्तव्यम् ?

(घ) किमर्थं वृत्तं संरक्षेत् ?

(ङ) वित्तं किं करोति ?

५. **श्लोकौ पूरयत**

.......... यः परित्यज्य .................. ।

श्रीप्राणधनदारेभ्यः..... स .............. ॥

वृत्तं ....... संरक्षेद् ......... च याति च ।

अक्षीणो ........ क्षीणो ......... हतो हतः ॥

६. **पदानि संशोधयत**

**छिप्रम्, परीहियते, कुरवन्, पुन्यकिर्तीः, सम्रक्षेत्, अक्छिणः ।**

७. **श्लोकं पठित्वा समुचित्ते विकल्पे चिह्नं (√) दत्त**

**विद्या ददाति विनयं विनयाद् याति पात्रताम् ।**

**पात्रत्वाद् धनमाप्नोति धनाद् धर्मं ततः सुखम् ॥**

(क) विद्या किं ददाति ?

(अ) विनयम् (आ) धनम् (इ) मानम्

(ख) कस्मात् पात्रतां याति ?

(अ) पुस्तकात् (आ) कलमात् (इ) विनयात्

(ग) धनं कथं प्राप्यते ?

(अ) वीरत्वात् (आ) पात्रत्वात् (इ) अलसत्वात्

(घ) मनुष्यः सुखं कुतः प्राप्नोति ?

(अ) पापात् (आ) रोदनात् (इ) धर्मात्

८. **अधस्तनानि पदानि प्रयुज्य वाक्यानि रचयत**

**धर्मार्थौ, परित्यज्य, क्षिप्रम्, अश्नुते, अत्यन्तम्, वृत्तम्, याति, क्षीणः, हतः ।**

९. अत्र विपरीतार्थकपदे के ?

पापं कुर्वन् पापकीर्तिः पापमेवाश्नुते फलम् ।
पुण्यं कुर्वन् पुण्यकीर्तिः पुण्यमत्यन्तमश्नुते ॥

(क) पापम् - ------------------------

(ख) पापकीर्तिः - --------------------

१०. शिक्षकस्य सहायतया नेपालीभाषायाम् अनूद्य कक्षायां श्रावयत

कस्यचित् किमपि नो हरणीयम्
मर्मवाक्यमपि नोच्चरणीयम् ।

श्रीपतेः पदयुगं स्मरणीयम्
लीलया भवजलं तरणीयम् ॥



११. श्लोकं पठित्वा मूर्खस्य लक्षणं लिखत

अनाहुतः प्रविशति अपृष्टो बहु भाषते ।
अविश्वस्ते विश्वसिति मूढचेता नराधमः ॥

१२. अनुच्छेदं पठित्वा पञ्चसङ्ख्यासम्बद्धानि नामानि उल्लिख्य तालिकां निर्मात

गणिते सङ्ख्यावाचकपदानां प्रयोगः बाहुल्येन भवति । अङ्कानां प्रयोगेण सङ्ख्या ज्ञाप्यते । अङ्कानां प्रयोगः न केवलं सङ्ख्यायाः बोधनाय अपि तु संस्कृतेः प्रकाशनाय च भवति । 'पञ्च' इति अङ्कः अस्माकं संस्कृतेः बह्वर्थं प्रकटयति । पञ्चदैवतं प्रसिद्धम् - विष्णुः,

शिवः, गणेशः, सूर्यः देवी च । पञ्चाङ्गम् पञ्चभिः अङ्गैः निर्मीयते - तिथि-वार-नक्षत्र-योग-करणानि । स्वाध्याय-होमातिथिपूजन-तर्पणपिण्डदान-बलिवैश्वदेवानां समवायः पञ्चमहायज्ञो भवति । पञ्चपल्लवे आम्राश्वत्थ-वट-प्लक्षोदुम्बराणां नामानि आयान्ति । पञ्चधान्यं गोधूम-यव-धान्य-मुद्ग-तिलानां समूहो वर्तते । पञ्चामृतं गोः दुग्ध-दधि-घृतानां मधुशर्करयोश्च योजनेन जायते । पञ्चगव्यं च गोरेव गोमूत्र-गोमय-दुग्ध-दधि-घृतैः सम्पद्यते । पञ्चोपचारे पुष्प-चन्दन-धूप-दीप-नैवेद्यानि परिगण्यन्ते । पञ्चमहाव्रते अहिंसा-सत्यास्तेय-ब्रह्मचर्यापरिग्रहाः गृह्यन्ते । हस्तयोः, पादयोः मुखमण्डलस्य च स्नानं पञ्चस्नानं निगद्यते । पञ्चाग्नौ आवसथ्याहवनीय-दक्षिणाग्न्यन्वाहार्य-गार्हपत्यानां नामानि प्रसिद्धानि वर्तन्ते । पञ्चरत्नं हीरक-मौक्तिक-प्रवाल-नीर-मणिभिः निर्मितमस्ति । पञ्चकोषं यथा - अन्नमयः, प्राणमयः, मनोमयः, विज्ञानमयः, आनन्दमयः च । अस्माकं देशे पञ्च पञ्चम्यः प्रसिद्धाः सन्ति - नागपञ्चमी, विरूढापञ्चमी, ऋषिपञ्चमी, विवाहपञ्चमी, श्रीपञ्चमी च । बौद्धमार्गे पञ्चशीलम् इत्यनेन अहिंसा, सत्यम्, अस्तेयम, ब्रह्मचर्यम्, मद्यपानेऽप्रवृत्तिश्च स्वीक्रियते ।

**१३. लघुकथां पठित्वा प्रश्नान् उत्तरयत**

एकदा आदर्शदम्पती सीतारामौ कुत्रचित् स्थितौ आस्ताम् । तयोः पार्श्वे वीरवरः हनुमान् च आसीत् । लक्ष्मणोऽपि सहैव आसीत् । सीता भाले सिन्दूरं धृतवती आसीत् । हनुमान् तद् अपश्यत् । स सीतां भाले सिन्दूराधानस्य कारणम् अपृच्छत् । सीता अवदद्, "अनेन मम स्वामिनः आयुः प्रवर्धते, हितं भवति, स सर्वत्र विजयं च अवाप्नोति ।" हनुमान् आह, "मातः ! तर्हि अहमपि एतदेव करोमि ।" इत्युक्त्वा स सर्वं शरीरं सिन्दूरेण रक्तम् अकारयत् । वस्त्रं च रक्तमेव अधरत् । अधुना अपि हनुमतः मूर्तिः सर्वत्र रक्तवर्णा दृश्यते ।

**प्रश्नाः**

(क) सीतारामयोः पार्श्वे कौ आस्ताम् ?

(ख) सीता किं धृतवती आसीत् ?

(ग) हनुमान् किम् अपृच्छत् ?

(घ) सीता किम् अकथयत् ?

(ङ) हनुमान् किम् अकरोत् ?

(च) हनुमतः मूर्तिः कीदृशी दृश्यते ?

## व्यवहारानुशीलनम्

१. कक्षायाः सर्वे छात्राः समूहद्वये मिलित्वा वसत । समूहस्य नामकरणं कुरुत । प्रथमसमूहस्य छात्राः स्वीकर्तव्यान् गुणान् कथयत, द्वितीयसमूहस्य छात्राः च त्यक्तव्यान् दुर्गुणान् कथयत ।

२. विद्यालये अनुशासनस्य पालनाय किं किं स्मर्तव्यं भवति, तेषां सूचीं निर्माय सूचनापट्टे प्रकाशयत ।

३. समुचिते विकल्पे चिह्नं (√) दत्त

(क) शिक्षकाणाम् अनुपस्थितौ किं करोषि ?

(अ) कोलाहलं करोमि (आ) पठनाभ्यासं करोमि (इ) बहिः भ्रमामि

(ख) अनुजैः सह कथं व्यवहरसि ?

(अ) सक्रोधं व्यवहरामि (आ) सस्नेहं व्यवहरामि (इ) शत्रुवत् व्यवहारामि

(ग) आत्मनः ज्येष्ठानां वचनं पालयसि न वा ?

(अ) न पालयामि (आ) केवलं शृणोमि (इ) पालयामि

(घ) मातरं पितरं गुरुं च किं करोषि ?

(अ) सत्करोमि (आ) अवमानयामि (इ) तिरस्करोमि

बोधिसत्त्वकथा

# दानशीलता

भगवान् बोधिसत्त्वः कस्मिँश्चिद् जन्मनि एकः धनिकः आसीत् । स त्यागेन, शीलेन, विनयेन, ज्ञानेन च सम्पन्नः आसीत् । धनेन कुबेरतुल्यः स दानवीरः आसीत् । स निरन्तरं दानं करोति स्म । याचकाः तस्य द्वारात् कदाचिद् अपि विमुखाः न प्रतिनिवर्तन्ते स्म । स दानेन एव सन्तुष्टः भवति स्म । तस्य धनस्य उपयोगः दीनानाम् आवश्यकतापूर्त्यै भवति स्म । परोपकाराय एव स स्वधनं सार्थकं मन्यते स्म । कार्पण्यादिदोषैः सः अविषह्यः आसीत् । अतः सः अविषह्यनाम्ना एव प्रसिद्धः अभवत् ।



तस्य दानशीलतां दृष्ट्वा सर्वे आश्चर्यान्विताः आसन् । एकदा देवराजः ‘अविषह्यः धनक्षयेण कार्पण्यम् उपगच्छति न वा’ इति परीक्षितुम् ऐच्छत् । ततः स प्रतिदिनं तस्य धनम् गोपायितुम् आरभत । क्रमेण धनक्षये अपि तस्मिन् लेशमात्रम् अपि कार्पण्यं नैव समुत्पन्नम् । स कथञ्चिद् अपि दानशीलतां न अत्यजत् । एतद् दृष्ट्वा देवेन्द्रः अत्यन्तं विस्मितः अभवत् । स एकस्यां रात्रौ तस्य समग्रम् अपि धनम् अगोपायत् । स अविषह्यस्य पार्श्वे केवलम् एकाम् असिकाम् एकां रज्जुं च अत्यजत् ।

*शिक्षणालोकः*

*बोधिसत्त्वस्य अन्येषाम् महापुरुषाणां वा दानसम्बद्धाः कथाः श्रावयितव्याः, छात्राः च दाने प्रेरणीयाः ।*

अपरस्मिन् दिने प्रातः स जागृतः अभवत् । स गृहं धनहीनम् अपश्यत् । सः अचिन्तयत्, "यदि केनचिद् भिक्षायाचनार्थम् अनभ्यस्तेन मम धनम् नीतं स्यात् तर्हि धनस्य सदुपयोगः भवेत् । परं यदि दुर्भाग्यवशात् केनचिद् मम धनं गोपितं स्यात् तर्हि चिन्तायाः विषयः भवेत् । धनेन सह मित्रता अस्थिरा भवति । अतः धनक्षयेण अहं किञ्चिद् अपि दुःखं न अनुभवामि । किन्तु प्राप्त्याशया आगताः याचकाः विमुखाः प्रतिनिवर्तन्ते इति दुःखस्य विषयः अस्ति ।" सद्यः निर्धनः स भिक्षायाम् अनभ्यासात् याचितुं न अशक्नोत् । भिक्षायाचनं दुष्करम् अस्ति इति बोधेन तस्य मनसि याचकान् प्रति इतः अपि स्नेहः समुत्पन्नः ।

याचकानां सत्कारं कथं कुर्याम् इति विचार्य भ्रमन् स रज्जुम् असिकां च अपश्यत् । स रज्जुम् असिकां च गृहीत्वा घासं कर्तितुम् अगच्छत् । घासं विक्रीय उपलब्धेन धनेन स याचकानां



सत्कारम् अकरोत् । तादृशे दारिद्र्ये अपि तस्य दानशीलतां दृष्ट्वा देवराजस्य मनसि तं प्रति आदरभावः समुत्पन्नः परन्तु देवराजः परीक्षितम् अपि तं पुनः परीक्षितुम् ऐच्छत् । स प्रत्यक्षः सन् अकथयत्, "भो अविषह्य ! त्वं दानेन एतादृशीम् अवस्थां प्राप्तवान् असि । सञ्चयेन विना क्षयम् एव करोषि चेत् धनं नश्यति एव । अतः दानं परित्यज, तेन त्वं पूर्ववत् समृद्धः भवसि ।" एतत् श्रुत्वा अविषह्यः अवदत्, "अतिदैन्ये अपि मानवधर्मः न त्यजनीयः । तेन धनेन किम् ? येन अहं कृपणः भवेयम् । परिग्रहः चिन्तां जनयति, दानं तु सन्तोषकारणम् अस्ति । अहं चिन्तया कालं

यापयितुं न इच्छामि । अतः अहं तां समृद्धिं न इच्छामि प्रत्युत दुःखेन एव याचकान् सत्करोमि ।"

देवराजः अविषह्यस्य दाने प्रतिबद्धतां दृष्ट्वा प्रसन्नः अभवत् । सः अकथयत्, "अविषह्य ! तव दानशीलता स्तुत्या अस्ति । अहं तव परीक्षायाः धृष्टताम् अकरवम् । मां क्षमस्व । त्वं नितरां दानशीलः भव । तव धनम् अक्षयं स्यात् ।" एवम् उक्त्वा देवराजः धनं प्रत्यावर्त्य अन्तर्हितः अभवत् । अविषह्यः दानेन एव जीवनम् अयापयत् ।

## अभ्यासः

### पाठानुशीलनम्

१. **शुद्धमुच्चारयत**

**आवश्यकतापूर्त्यै, कार्पण्यादिदोषैः, आश्चर्यान्विताः, भिक्षायाचनार्थम्, दुर्भाग्यवशात्, प्राप्त्याशया, अनभ्यासात्, दारिद्र्ये ।**

२. **पाठस्य अनुच्छेदान् क्रमेण वाचयत ।**

३. **पाठस्य तृतीयस्य अनुच्छेदस्य श्रुतिलेखनं कुरुत ।**

४. **एकपदेन उत्तरयत**

(क) अविषह्यः निरन्तरं किं करोति स्म ?

(ख) देवेन्द्रः रात्रौ अविषह्यस्य किम् अगोपायत् ?

(ग) धनेन सह मित्रता कीदृशी भवति ?

(घ) अविषह्यः किं विक्रीय याचकानां सत्कारम् अकरोत् ?

(ङ) अतिदैन्ये अपि कः न त्यजनीयः ?

५. **सङ्क्षेपेण उत्तरयत**

(क) अविषह्यः कैः गुणैः सम्पन्नः आसीत् ?

(ख) स किमर्थम् अविषह्यनाम्ना परिचितः अभवत् ?

(ग) देवेन्द्रः किमर्थं विस्मितः अभवत् ?

(घ) समग्रस्य धनस्य क्षये अविषह्यः किम् अचिन्तयत् ?

(ङ) देवराजस्य कथनं श्रुत्वा अविषह्यः किम् अवदत् ?

६. **कथाम् आधृत्य 'दानस्य महिमा' इति विषये एकम् अनुच्छेदं लिखत ।**

७. **उचितैः पदैः रिक्तस्थानं पूरयत ।**

**असिकाम्, दानेन, दानवीरः, दानशीलताम्, चिन्ताम्**

(क) धनेन कुबेरतुल्यः स ................ आसीत् ।

(ख) स कथञ्चिद् अपि ................. न अत्यजत् ।

(ग) स रज्जुम् .............. च अपश्यत् ।

(घ) परिग्रहः ................. जनयति ।

(ङ) अविषह्यः .................... एव जीवनम् अयापयत् ।

८. **परस्परं मेलयत**

| | |
|---|---|
| भगवान् बोधिसत्त्वः | अविषह्यः आसीत् । |
| कार्पण्यादिदोषैः सः | सत्कारम् अकरोत् । |
| स याचकानां | निन्दनीयं भवति । |
| दानं तु | एकः धनिकः आसीत् । |
| तव दानशीलता | स्तुत्या अस्ति । |
| | सन्तोषकारणम् अस्ति । |

९. **अधस्तनं श्लोकं पठित्वा शिक्षकस्य सहयोगेन आशयं स्फुटीकुरुत**

**मरुस्थल्यां यथा वृष्टिः क्षुधार्ते भोजनं यथा ।**
**दरिद्रे दीयते दानं सफलं पाण्डुनन्दन ॥**

१०. **अधस्तनं गद्यांशं पठित्वा प्रदत्तान् प्रश्नान् उत्तरयत**

एकः मूर्तिकारः आसीत् । स मूर्तीनां विक्रयेण धनम् अर्जयति स्म । तस्य मूर्तयः अन्येषाम् अपेक्षया अधिकं मूल्यं प्राप्नुवन्ति स्म । तस्य पुत्रः अपि पितुः मूर्तिकलया प्रेरितः अभवत् । सः अपि मूर्तीः निर्मातुम् ऐच्छत् । मूर्तिकारः पुत्रं मूर्तिकलाम् अशिक्षयत् । पुत्रः अपि मूर्तीः निर्मितवान् । स च पित्रा सह स्वमूर्तीः नीत्वा आपणं गन्तुम् आरभत । तस्य मूर्तयः पितुः मूर्तीनाम् अपेक्षया न्यूनं मूल्यं प्राप्नुवन्ति स्म । पिता गृहम् आगत्य पुत्रनिर्मितानां मूर्तीनां

दोषान् कथयति स्म । पुत्रः ध्यानेन पितुः वचनं श्रुत्वा त्रुटिं शोधयति स्म । एवं रीत्या पुत्रस्य मूर्तयः पितुः मूर्तिभ्यः अधिकं मूल्यं प्राप्तुम् आरभन्त । तस्मिन् समये अपि मूर्तिकारः पुत्रस्य मूर्तिषु दोषान् निर्दिशति स्म । एकदा पितुः दोषनिर्देशेन पुत्रः कुपितः सन् अकथयत्, "मम मूर्तयः भवतः अपेक्षया अधिकं मूल्यं प्राप्नुवन्ति तथापि भवान् दोषान् एव दर्शयति ।" पुत्रस्य वचनं श्रुत्वा स्मितः सन् मूर्तिकारः अकथयत्, "पुत्र ! कला कदापि पूर्णा न भवति । यः स्वकलां पूर्णां मनुते, तस्य प्रगतिः अवरुद्धा भवति । अहम् अपि स्वकलां पूर्णां मतवान् । अतः मम कला तव कलायाः अपेक्षया न्यूना अभवत् ।" पितुः वचनेन स सन्तुष्टः अभवत् । ततः स मूर्तीः निर्माय पितरं स्वयमेव दोषान् प्रष्टुम् आरभत । कालान्तरे स प्रसिद्धः मूर्तिकारः अभवत् ।

**प्रश्नाः**

(क) मूर्तिकारः कथं धनम् अर्जयति स्म ?

(ख) मूर्तिकारः कं मूर्तिकलाम् अशिक्षयत् ?

(ग) पिता गृहम् आगत्य किं कथयति स्म ?

(घ) पुत्रः कुपितः सन् पितरं किम् अकथयत् ?

(ङ) पुत्रस्य वचनं श्रुत्वा मूर्तिकारः किम् अवदत् ?

**११. श्लोकयोः सरलार्थाधारेण क्रियाकलापान् कुरुत**

**उपदेशं विदुः शुद्धं सन्तस्तमुपदेशिनः ।**
**श्यामायते न विद्वत्सु यः काञ्चनमिवाग्निषु ॥**
**अकालो नास्ति धर्मस्य जीविते चञ्चले सति ।**
**एवमादि त्वया सौम्य ! विज्ञाप्यो वसुधाधिपः ॥**

**सरलार्थः**

सज्जनाः तादृशम् उपदेशम् एव शोभनं मन्यन्ते, यः उपदेशः विद्वत्समाजे च अग्निना परिशोधितः सुवर्णः इव प्रकाशते, प्रतिष्ठां च प्राप्नोति ।

राजकुमारः सिद्धार्थः सारथिं छन्दकं प्रति कथयति - प्रिय ! जीवनस्य समयः निश्चितः नास्ति । अतः शुभकर्मणः ज्ञानस्य वा कृते असमयः कदापि न भवति । एवं तथ्यं मम पितरं शुद्धोदनं प्रति निवेदय । अहं ज्ञानप्राप्त्यर्थम् अधुना एव गृहं परित्यज्य गच्छामि ।

**(अ) पूर्णवाक्येन उत्तरयत**

(क) कः विद्वत्समाजे प्रतिष्ठां प्राप्नोति ?

(ख) कस्य कृते कदापि असमयः न भवति ?

(ग) कः ज्ञानं प्राप्तुं गृहं परित्यजति ?

(घ) शुद्धोदनः कः अस्ति ?

**(आ) उचितम् (√) अनुचितं (×) वा चिनुत**

(क) सिद्धार्थः छन्दकद्वारा सन्देशं प्रेषयति । ( )

(ख) छन्दकः राजकुमारस्य सिद्धार्थस्य सारथिः अस्ति । ( )

(ग) सिद्धार्थस्य पिता शुद्धोदनः अस्ति । ( )

(घ) शोभनः उपदेशः विद्वत्समाजे निन्दां प्राप्नोति । ( )

(ङ) सुवर्णः अग्निना परिशोधितः भवति । ( )

(च) सज्जनाः शोभनस्य उपदेशस्य विषये कथयन्ति । ( )

(छ) जीवनस्य समयः निश्चितः भवति । ( )

## व्यवहारानुशीलनम्

**१. त्वया कृतस्य दानस्य विषये कक्षायां वद ।**

**२. तव गृहे भिक्षुकः आगच्छति चेत् कथं व्यवहरसि ? कक्षायां श्रावय ।**

**३. समुचिते विकल्पे चिह्नं (√) दत्त**

(क) त्वं बुभुक्षिताय किं ददासि ?

(अ) द्रव्यम् (आ) भोजनम् (इ) गालीम्

(ख) त्वं रुग्णाय किं ददासि ?

(अ) औषधम् (आ) फलम् (इ) पुष्पम्

(ग) त्वं शैत्येन कम्पमानाय किं ददासि ?

(अ) जलम् (आ) वस्त्रम् (इ) हिमम्

(घ) त्वं पिपासिताय किं ददासि ?


(अ) जलम् (आ) तैलम् (इ) चायम्

जीवनवृत्तम्

# चाणक्यः

संसारे प्रतिक्षणम् अनेके जनाः जायन्ते, म्रियन्ते च । परं ये जीवने महत्त्वपूर्णानि कार्याणि कृत्वा समाजाय अनुकरणीयं चरितं प्रस्तुवन्ति, ते अमरत्वं प्राप्नुवन्ति । तादृशेषु जनेषु चाणक्यः अपि एकः अस्ति, यः साहसेन, आत्मविश्वासेन, नीतिचेतनया च जगति प्रसिद्धः अस्ति । चाणक्यस्य स्मरणेन एव जनाः आत्मनि उत्साहस्य विवेकस्य च वृद्धिम् अनुभवन्ति ।

मगधप्रदेशे ईशवीयाब्दस्य आरम्भात् ३०० वर्षेभ्यः पूर्वं निर्धने ब्राह्मणपरिवारे चाणक्यः अजायत । तस्य पितुः नाम चणकः आसीत् । तस्य वास्तविकं नाम विष्णुगुप्तः आसीत् । बाल्यकाले एव तस्य माता दिवं गतवती । मातृवात्सल्येन विमुखः स पित्रा सह एव प्रारम्भिकी शिक्षां गृहीतवान् ।



*शिक्षणालोकः*

*महापुरुषाणां विषये अध्येतुं छात्राः प्रेरणीयाः । महापुरुषाणां जीवनवृत्तम् अन्विष्य ते पाठनीयाः च ।*

दुराचारिणा शासकेन दत्तेन मृत्युदण्डेन तस्य पिता अपि बाल्यकाले एव तं त्यक्त्वा दिवं गतवान् । अतः तस्य बाल्यजीवनं कष्टपूर्णम् अभवत् । गुरुभक्त्या, सौहार्दपूर्णेन च व्यवहारेण स गुरून् वशे अकरोत् । ततः स गान्धारप्रदेशस्य तक्षशिलाविश्वविद्यालये अध्ययनस्य अवसरं प्राप्तवान् । तत्र चाणक्यः भाषाशास्त्रम्, राजनीतिम्, अर्थशास्त्रम्, युद्धशास्त्रम्, इतिहासम्, दर्शनानि च अधीतवान् । अध्ययनानन्तरं स तस्यैव विश्वविद्यालयस्य प्राचार्यः कुलपतिश्च सञ्जातः । शिक्षायाः प्रयोगात्मकं रहस्यम् उद्घाटयन् देशमुक्तये स ज्ञानस्य प्रयोगम् अकरोत् । दृढप्रतिज्ञः चाणक्यः मगधदेशम् अत्याचारिणः राज्ञः धनानन्दस्य शासनाद् मुक्तवान् ।

आचार्यः चाणक्यः समाजविकासाय व्यक्तिविकासम्, व्यक्तिविकासाय च स्वभावविकासम् इच्छति स्म । चेतनायाः विकासेन जनः सफलः भवति, तेन च समाजः सफलः भवति इति चाणक्यस्य सिद्धान्तः आसीत् । चाणक्यः जनस्य गुणानां विकासाय धर्मस्य आश्रयम् इच्छति स्म । धर्मश्च नीतौ, सत्कर्मणि, मानवतायाम्, पारस्परिकप्रेम्णि च आश्रितः भवति इति चाणक्यः कथयति स्म । इमम् एव सिद्धान्तम् अनुसृत्य चाणक्यः स्वशिष्यस्य चन्द्रगुप्तस्य व्यक्तित्वं परिवर्तितवान् ।

धर्मानन्दस्य शासनं समाप्य चाणक्यः चन्द्रगुप्तं राजानम् अकरोत् । स्वयं सत्तायां न स्थित्वा अपि राज्यं सञ्चालयितुं शक्यते इत्यस्य स उदाहरणम् अस्ति । स चन्द्रगुप्तस्य परामर्शदाता आसीत् । पदस्य, धनस्य, पुरस्कारस्य, नामप्रचारस्य, महत्तायाः च लोभं चाणक्यः कदापि न कृतवान् ।

चाणक्यः चाणक्यनाम्ना चाणक्यनीतिम्, कौटिल्यनाम्ना च अर्थशास्त्रं विरचितवान् । मौर्यवंशस्य शासनकाले कौटिल्यस्य अर्थशास्त्रम् एव आधृत्य शासनं सञ्चाल्यते स्म । अतः तदेव विश्वस्य लिखितं प्राचीनतमं विधिशास्त्रम् अस्ति इति वक्तुं शक्यते ।

चाणक्यस्य ग्रन्थयोः व्यक्तेः, परिवारस्य, समाजस्य, राष्ट्रस्य च सुसञ्चालनाय आवश्यकी नीतिः वर्णिता अस्ति । तत्र राजनीतौ, शासने च धर्मस्य महत्त्वं प्रतिपादितम् अस्ति । कूटनीतेः प्रयोगः धर्मरीत्या कथं कार्यः इति तत्रत्यः विषयः वर्तते । चाणक्यः लोकतन्त्रात्मकशासनव्यवस्थायां विश्वसिति स्म । अतः तस्य अर्थशास्त्रे लोकतान्त्रिकशासनपद्धतेः मार्गचित्रं प्रस्तुतम् आसीत् ।

वस्तुतः चाणक्यः नीतेः, शासनपद्धतेः, धर्मस्य च प्रमुखः मार्गदर्शकः वर्तते । चाणक्यस्य इव आचारनिष्ठं जीवनम्, दृढा प्रतिज्ञा, कर्मण्यता च सर्वेषु आवश्यकाः सन्ति । चाणक्यस्य धर्मनीतेः, उपदेशानां च पालना अद्यापि लाभपूर्णा भवति ।

## अभ्यासः

### पाठानुशीलनम्

१. **शुद्धमुच्चारयत**

**आत्मविश्वासेन, कष्टपूर्णम्, दृढप्रतिज्ञः, मौर्यवंशस्य, पारस्परिकप्रेम्णि, लाभपूर्णा ।**

२. **शुद्धं कृत्वा लिखत**

**प्रसीद्धः, शह, राजनितीम्, बिकासाय, परामर्सः, संतूलितम् ।**

३. **पाठस्य चतुर्थस्य अनुच्छेदस्य श्रुतिलेखनं कुरुत ।**

४. **एकपदेन उत्तरयत**

(क) कस्य स्मरणेन जनाः आत्मनि उत्साहस्य वृद्धिम् अनुभवन्ति ?

(ख) चाणक्यः केन सह प्रारम्भिकीं शिक्षां गृहीतवान् ?

(ग) चाणक्यः मगधदेशं कस्य शासनाद् मुक्तवान् ?

(घ) चाणक्यः कं राजानं कृतवान् ?

(ङ) चाणक्यः व्यक्तित्वविकासाय किम् इच्छति स्म ?

(च) चाणक्यस्य इव चरितं केषु आवश्यकम् अस्ति ?

५. **सङ्क्षेपेण उत्तरयत**

(क) चाणक्यः कैः गुणैः जगति प्रसिद्धः अस्ति ?

(ख) चाणक्यस्य जन्म कदा कुत्र च अभूत् ?

(ग) चाणक्यः कथं लक्षशिलाविश्वविद्यालये अध्ययनस्य अवसरं प्राप्तवान् ?

(घ) जनः कथं सफलो भवति ?

(ङ) चाणक्यस्य ग्रन्थयोः किं किम् अस्ति ?

(च) चाणक्यः कस्यां शासनव्यवस्थायां विश्वसिति ?

६. **'चाणक्यस्य सिद्धान्तः' इत्यस्मिन् विषये स्वभाषया एकम् अनुच्छेदं लिखत ।**

## ७. अधोलिखितां कथां पठित्वा सन्देशं लिखत

एकः महाधनिकः आसीत् । तस्य बहवः सेवकाः सेविकाश्च आसन् । स सर्वाणि सुखानि अनुभवति स्म । सर्वम् सदपि तस्य एकं दुःखम् आसीत् । रात्रौ निद्रा नायाति स्म । क्षणं सुप्तोऽपि स भयानकं स्वप्नं पश्यति स्म । तेन स अत्यन्तं व्यग्रः अभवत् ।

एकदा महाधनिकस्य नगरम् एकः साधुः आगतवान् । साधुः सर्वेषां दुःखानि निवारयति इति जनविश्वासः आसीत् । बहवः नगरवासिनः दुःखनिवारणाय साधुम् उपागच्छन् । महाधनिकोऽपि तत्र गतवान् । महाधनिकः स्वस्य दुःखं साधुं न्यवेदयत् । सर्वं श्रुत्वा साधुः अवोचत्, "तव दुःखस्य एकमात्रं कारणमेतदेव अस्ति यत् त्वम् अपाङ्गः असि ।" साधोः वचनं श्रुत्वा विस्मितः सन् महाधनिकः पृष्टवान्, "भवान् मां कथम् अपाङ्गं कथयति ? मम सर्वाणि अङ्गानि पूर्णानि सबलानि च सन्ति ।" साधुः विहस्य प्रत्यवदत्, "स न अपाङ्गः यस्य हस्तपादादीनि अङ्गानि न सन्ति, विकृतानि वा वर्तन्ते । वस्तुतः स एव अपाङ्गः यः हस्तपादादिषु सत्स्वपि तेषाम् उपयोगं न करोति । त्वं स्वयं किमपि न करोषि । सर्वाणि कार्याणि सेवकैः सेविकाभिश्च कारयसि । त्वत्तोऽधिकः अपरः अपाङ्गः जगति को भवेत् ? त्वं सर्वाङ्गैः अपाङ्गः असि ।" सलज्जः महाधनिकः गृहं गतवान् ।

## ८. सत्यम् असत्यं वा विवेचयत

(क) ये अनुकरणीयं चरितं प्रस्तुवन्ति, ते अमराः भवन्ति ।

(ख) चाणक्यः धनिके परिवारे अजायत ।

(ग) चाणक्यः स्वज्ञानस्य उपयोगं देशस्य मुक्तये कृतवान् ।

(घ) धनानन्दस्य शासनं समाप्य चाणक्यः स्वयं राजा अभवत् ।

(ङ) चाणक्यः राजनीतौ धर्मस्य महत्त्वं प्रदर्शितवान् ।

## ९. रिक्तस्थानं पूरयत

(क) चाणक्यस्य पितुः नाम ............ आसीत् ।

(ख) चाणक्यस्य वास्तविकं नाम ............. आसीत् ।

(ग) तक्षशिलाविश्वविद्यालयः ............. प्रदेशे आसीत् ।

(घ) .......... विश्वस्य प्रथमं संविधानम् अस्ति ।

(ङ) अर्थशास्त्रे .......... मार्गचित्रं प्रस्तुतम् अस्ति ।

१०. **पदानि प्रयुज्य वाक्यानि रचयत**

**जगति, त्यक्त्वा, अधीतवान्, इच्छति, नीतिः ।**

८. **चाणक्यविषये पठित्वा प्रश्नान् उत्तरयत**

चाणक्यः मगधदेशे निवसति स्म । सः राज्ञः चन्द्रगुप्तस्य अमात्यः आसीत् । सः राजनीतिज्ञः आसीत् । यद्यपि सः अमात्यः आसीत् तथापि पर्णशालायां निवसति स्म । तस्य पर्णशाला नगराद् बहिः आसीत् । सः अनुशासितश्च आसीत् ।

एकस्मिन् दिने राजा चाणक्याय बहून् कम्बलान् समर्पितवान् । "एतान् कम्बलान् दीनेभ्यः प्रयच्छ" इति च निर्दिष्टवान् । चाणक्यः कम्बलान् गृहीत्वा पर्णशालां प्रति प्रस्थितवान् । एतद् विज्ञाय केचन चौराः रात्रौ चाणक्यस्य पर्णशालां प्रविष्टवन्तः । समयः शीतयामस्य मध्यरात्रस्य चासीत् । चाणक्यः कटे सुप्तः आसीत् । तस्य समीपे कम्बलानां राशिः आसीत् तथापि चाणक्यः केवलं रिक्ते कटे सुप्तः आसीत् । कम्बलं विनापि निद्रितं चाणक्यम् अवलोक्य चौराः विस्मिताः जाताः । चौरकार्यम् अपि विस्मृत्य ते सुप्तं चाणक्यं समुद्बोध्य अपृच्छन्, "चाणक्य ! समीपे कम्बलानां राशिः अस्ति तथापि किमर्थं कम्बलैः अनाच्छाद्य शयनं करोषि ?" प्रत्युत्तरे चाणक्यः अवदत्, "कम्बलाः तु महाराजेन दरिद्रेभ्यः वितरणार्थं प्रदत्ताः । एते मम कृते न । श्वः प्रातःकाले तेभ्यः वितरिष्यामि । तेषामुपयोगे न ममाधिकारः । अहं तु अस्याम् अवस्थायाम् एव सन्तुष्टः अस्मि ।"

चाणक्यस्य प्रत्युत्तरं श्रुत्वा चौराः लज्जाम् अन्वभवन् । "परद्रव्यस्य उपयोगः नोचितः" इति चाणक्यस्याशय आसीत् । "परन्तु वयं प्रतिदिनं परद्रव्यम् अपहरामः । एतत् नोचितम्" इति विचार्य चौराः क्षमां अयाचन्त । ततः सुकर्मणि रताः ते चौराः सज्जनाः अभवन् ।

**अस्माभिः अपि सदैव सुकर्म कर्तव्यम् ।**

**प्रश्नाः**

(क) चाणक्यः कः कीदृशः च आसीत् ?

(ख) चौराणां प्रश्नः कः आसीत् ?

(ग) चाणक्यस्य चौरान् प्रति उत्तरं किम् ?

(घ) कीदृशाः चौराः सज्जनाः अभवन् ?

१२. **श्लोकयोः सरलार्थं पठित्वा सखिभिः सह विमृशत**

**आचाराद् विच्युतः कोऽपि नाप्नोति शोभनं फलम् ।**
**आचारेण तु संयुक्तः सम्पूर्णफलभाग् भवेत् ॥**
**दुराचारो हि पुरुषो लोके भवति निन्दितः ।**
**दुःखभागी च सततं व्याधितोऽल्पायुरेव च ॥**

**सरलार्थः**

आचारेण हीनः जनः अशोभनम् एव फलं प्राप्नोति । यः जनः आचारवान् भवति स सदैव शोभनानि फलानि पर्याप्तरूपेण प्राप्नोति । दुराचारी जनः नित्यं दुःखं प्राप्नोति ।

समाजे तस्य निन्दा भवति । स निरन्तरं रोगी भवति । स रोगस्य कारणेन चिरं जीवितुम् अपि न शक्नोति ।

## व्यवहारानुशीलनम्

१. **चाणक्यस्य जीवनात् त्वं कां शिक्षां गृहणासि ?**

२. **शिक्षकसाहाय्येन कस्यचित् शिक्षासेविनः जीवनवृत्तं कक्षायां प्रस्तुत्य समाजसेवायै आत्मनां कर्तव्यं लिखित्वा कक्षायां श्रावयत ।**

३. **अधः महता कार्येण प्रसिद्धानां महात्मनां नामानि प्रदत्तानि सन्ति । तेषां विषये शिक्षकं पृष्ट्वा प्रतिमहापुरुषं ग्रहणीयं गुणद्वयं लिखत ।**

आद्यशङ्कराचार्यः

फाल्गुनन्दः

षडानन्दः

पासाङल्हामुशेर्पा

भानुभक्ताचार्यः

नीतिपद्यम्

# उदारता

प्राणा यथात्मनोऽभीष्टा भूतानामपि ते तथा ।
आत्मौपम्येन भूतानां दयां कुर्वन्ति साधवः ॥
अयं निजः परो वेति गणना लघुचेतसाम् ।
उदारचरितानां तु वसुधैव कुटुम्बकम् ॥
बालो वा यदि वा वृद्धो युवा वा गृहमागतः ।
तस्य पूजा विधातव्या सर्वस्याभ्यागतो गुरुः ॥

**प्रथमः श्लोकः**

**पदच्छेदः**

प्राणाः, यथा, आत्मनः, अभीष्टाः, भूतानाम्, अपि, ते, तथा, आत्मौपम्येन, भूतानाम्, दयाम्, कुर्वन्ति, साधवः ।

**सरलार्थः**

सर्वेषां प्राणीनां कृते स्वस्य प्राणाः प्रियाः भवन्ति । यथा आत्मनः कृते आत्मनः प्राणाः अभीष्टाः भवन्ति, तथा एव सर्वेषां जीवानां कृते तेषां प्राणाः अभीष्टाः एव भवन्ति । एतद् मनसि स्वीकृत्य प्राणिनः स्वसदृशान् मत्वा सज्जनाः सर्वेषु प्राणिषु दयां कुर्वन्ति ।

**द्वितीयः श्लोकः**

अयम्, निजः, परः, वा, इति, गणना, लघुचेतसाम्, उदारचरितानाम्, तु, वसुधा, एव, कुटुम्बकम् ।

*शिक्षणालोकः*

*उदारभावनायाः विकासाय लिखितानां श्लोकानाम् सङ्कलनं कृत्वा तेषां वाचनार्थम्, अर्थकरणाय च छात्राः प्रेरयितव्याः ।*

**सरलार्थः**

अयं मम सम्बन्धी अस्ति, अयं च अपरः अस्ति इति भावना मन्दबुद्धीनां भवति । ते स्वजनानां कृते एव कार्यं कुर्वन्ति, सर्वेषां कृते न । परन्तु ये उदारभावनया व्यवहरन्ति ते पृथ्वीस्थितान् सर्वान् मानवान् स्वजनान् मत्वा कार्यं कुर्वन्ति ।

### तृतीयः श्लोकः

**पदच्छेदः**

बालः, वा, यदि, वा, वृद्धः, युवा, वा, गृहम्, आगतः, तस्य, पूजा, विधातव्या, सर्वस्य, अभ्यागतः, गुरुः ।

**सरलार्थः**

गृहे बालः, वृद्धः, युवा वा यः कः अपि आगन्तुं शक्नोति, परन्तु सः अतिथिः एव भवति । अतिथिः सर्वेषां कृते गुरुसदृशः भवति । अतः तस्य सत्कारः कर्तव्यः ।

## अभ्यासः

### पाठानुशीलनम्

१. **शुद्धमुच्चारयत**

**यथात्मनः, अभीष्टाः, आत्मौपम्येन, लघुचेतसाम्, कुटुम्बकम्, गृहमागताः, विधातव्या, अभ्यागतः ।**

२. **पाठस्थानां श्लोकानां श्रुतिलेखनं कुरुत ।**

३. **एकपदेन उत्तरयत**

(क) प्राणाः कस्य अभीष्टाः ?

(ख) साधवः किं कुर्वन्ति ?

(ग) केषां वसुधा एव कुटुम्बकम् ?

(घ) कस्य पूजा विधातव्या ?

(ङ) अभ्यागतः कः अस्ति ?

४. **एकवाक्येन उत्तरयत**

(क) किमर्थं साधवः प्राणिषु दयां कुर्वन्ति ?

(ख) मन्दबुद्धीनां व्यवहारः कीदृशः भवति ?

(ग) उदारचरिताः किं मन्वते ?

(घ) गृहे के आगन्तुं शक्नुवन्ति ?

(ङ) किमर्थम् अतिथेः सत्कारः कर्तव्यः ?

५. **अधस्तनानि पदानि प्रयुज्य वाक्यानि रचयत**

**भूतानाम्, तथा, कुर्वन्ति, साधवः, परः, वा, इति, वसुधा, युवा, विधातव्या, अभ्यागतः ।**

६. **श्लोकयोः सरलार्थाधारेण प्रश्नान् उत्तरयत**

**न क्वचिन्मानवः कुर्याद् हिंसनं सर्वप्राणिनाम् ।**
**भावं प्रेम्णो दयायाश्च सर्वत्र संसृजेन्नरः ॥**
**सर्वैः सह मिलित्वा तु नरः सुखमवाप्नुयात् ॥**
**ईर्ष्यां द्वेषं विहायैव मानवो मानवो भवेत् ॥**

**सरलार्थः**

सर्वेषां प्राणिनां जीवितुम् अधिकारः अस्ति । अतः मानवः कस्यचित् अपि प्राणिनः हिंसां कर्तुं कदापि न अर्हति । अपि तु स सर्वत्र सर्वेषु प्राणिषु दयां कुर्यात् । मानवः मनसि स्नेहस्य भावं संसृज्य सर्वत्र तम् एव भावं प्रसारयेत् ।

मानवः सर्वैः सह मिलित्वा व्यवहारं कुर्यात् । इत्थं कुर्वन् स सुखं प्राप्नोति । यदि स कलहं करोति तर्हि तद्विपरीतं दुःखं प्राप्नोति । स अन्येषां समुन्नतिं दृष्ट्वा ईर्ष्यां न कुर्यात् । अन्येषु अन्येषां कार्ये च रोषारोपणम् अपि न कुर्यात् । एवं दुर्भावनां परित्यज्य सर्वैः सह सद्भावेन एव मनुष्यः मनुष्यः भवति ।

(अ) **एकपदेन उत्तरयत**

(क) सर्वेषां प्राणिनाम् अधिकारः कः अस्ति ?

(ख) कः प्राणिनः हिंसां कर्तुं न अर्हति ?

(ग) मानवः कैः सह मिलित्वा व्यवहारं कुर्यात् ?

(घ) मानवः केषां कार्ये दोषारोपणं न कुर्यात् ?

**(आ) पूर्णवाक्येन उत्तरयत**

(क) मानवः कुत्र स्नेहस्य भावं प्रासारयत् ?

(ख) मानवः कदा दुःखं प्राप्नोति ?

(ग) मनुष्यः कथं मनुष्यः भवति ?

(घ) मानवः अन्येषां किं दृष्ट्वा ईर्ष्यां न कुर्यात् ?

**७. परस्परं मेलयत**

| | |
|---|---|
| सज्जनः | सत्कारयोग्यः भवति । |
| मूर्खः | सेवा कर्तव्या । |
| अतिथिः | दयां करोति । |
| वृद्धस्य | गन्तव्यं भवति । |
| | असभ्यः भवति । |

**८. रिक्तस्थानं पूरयत**

........ यथात्मनोऽभीष्टा भूतानामपि .... तथा ।

आत्मौपम्येन ......... दयां ........... साधवः ॥

बालो वा ...... वा वृद्धो ....... वा गृहमागतः ।

तस्य पूजा ............. सर्वस्याभ्यागतो ........ ॥

**९. श्लोकं पठित्वा प्रश्नान् उत्तरयत**

**न वाच्यः परिवादोऽयं न श्रोतव्यः कथञ्चन ।**

**कर्णावथ पिधातव्यौ प्रस्थेयं चान्यतो भवेत् ॥**

(क) कः न वाच्यः ?

(ख) कस्य श्रवणं न कर्तव्यम् ?

(ग) कस्यचन अपि निन्दायां किं कर्तव्यम् ?

(घ) कुतः प्रस्थातव्यम् ?

**१०. समीचीनकथने 'आम्', असमीचीनकथने च 'न' इति लिखत**

(क) आत्मनः कृते प्राणाः प्रियाः न भवन्ति ।

(ख) दुर्जनाः प्राणिषु दयां कुर्वन्ति ।

(ग) विवेकी 'अयं मम, अयं च अपरस्य' इति भेदव्यवहारं न करोति ।

(घ) बालः अतिथिः भवितुं न शक्नोति ।

(ङ) अतिथिः पूजनीयः भवति ।

**११. शिक्षकस्य सहयोगेन सरलार्थं लिखत**

**सत्यं ब्रूयात् प्रियं ब्रूयाद् न ब्रूयात् सत्यमप्रियम् ।**
**प्रियं च नानृतं ब्रूयाद् एष धर्मः सनातनः ॥**

**१२. मञ्जूषायाः सहयोगेन चित्रं सङ्क्षेपेण वर्णयत**

**बालिका, अतिथिः, माता, जलम्, कटे, उपविष्टः, कुशलम्, अतिथये, नमति, ददाति, पृच्छति ।**



१३. **कथां पठित्वा सन्देशं वदत**

एकं वनम् आसीत् । तत्र एकस्मिन् वृक्षे काकदम्पती अवसताम् । तयोः त्रयः शावकाः आसन् । एकदा ते अतीव तृषार्ताः अभवन् । काकः जलार्थं वने अभ्रमत् । वने एकः अपि जलाशयः नासीत् । तत्र जलस्याभावः आसीत् । ततः सः काकः अन्यद् वनमगच्छत् । तत्र स एकमाश्रममपश्यत् । आश्रमे एकः मुनीशः आसीत् । सः सूक्तीः अपठत् । काकः यत्रतत्र अपश्यत् । स तत्र एकं भोजनालयमपश्यत् । भोजनालये एकः घटः आसीत् । घटे अर्धं जलमासीत् । काकः घटस्य उपरि अवसत् । काकः अचिन्तयत् – किम् करोमीति ।

काकः बहिः अगच्छत् । चञ्च्वा कङ्कणानि गृहीत्वा पुनः पुनः घटे अस्थापयत् । तेन कारणेन क्रमशः घटस्य जलमुपरि आगच्छत् । काकः जलमपिबत् । ततः स स्वनीडमगच्छत् । स जलस्य विषये स्वजनान् अकथयत् । ततः सर्वे आश्रमं गत्वा इच्छानुसारेण जलमपिबन् ।

## व्यवहारानुशीलनम्

१. अस्माकं देशस्य परोपकारिषु महात्मसु कस्यचन एकस्य जीवनवृत्तं पठित्वा तस्य जीवनाद् ग्रहणीयां शिक्षां कथयत ।

२. आत्मना विहितस्य परोपकारस्य कानिचित् त्रीणि उदाहरणानि लिखत ।

३. परोपकारनिरतानां वस्तूनां जीवानां वा उदाहरणानुसारेण कार्याणि लिखत

| **वस्तूनां नाम यथा-** | **कार्यम्** |
|---|---|
| वृक्षः | वृक्षः छायाम्, फलम्, पत्रम्, पुष्पम्, समिधां च ददाति । |
| गौः | |
| नदी | |
| पर्वतः | |
| भूमिः | |

नीतिकथा

# समाधानाय प्रवर्तनीयम्



एकः चित्रकारः आसीत् । स शोभनानि चित्राणि रचयति स्म । स चित्रं निर्माय तस्य विषये जनेभ्यः प्रतिक्रियाम् इच्छति स्म । जनानां प्रतिक्रियानुसारं स चित्रे स्थितां त्रुटिं शोधयति स्म ।

अखण्डेन प्रयासेन दीर्घसाधनया च स एकदा एकं सुन्दरं चित्रं निर्मितवान् । तत् चित्रं तस्य कृते अमूल्यम् आसीत्, यतः तस्मिन् चित्रे तेन अधिकः समयः महान् परिश्रमश्च व्ययीकृतः आसीत् । अतः तस्य चित्रस्य विषये सः अधिकेभ्यः जनेभ्यः प्रतिक्रियाम् ऐच्छत् । तदनन्तरं स मार्गस्थे एकस्मिन् अश्वत्थवृक्षमण्डपे तत् चित्रं संस्थाप्य तत्रस्थां त्रुटिं चिह्नेन निर्देष्टुं सूचनां च कृतवान् ।

सायङ्कालं यावत् तस्मिन् चित्रे सहस्रशः चिह्नानि अङ्कितानि आसन् । सायङ्काले चित्रकारः चित्रं द्रष्टुम् अगच्छत् । चित्रे अङ्कितैः चिह्नैः चित्रमेव अदृष्टं जातम् आसीत् । चित्रकारः

*शिक्षणालोकः*

*पञ्चतन्त्र-हितोपदेशादिभ्यः रुचिकराः कथाः सङ्कलय्य कक्षायां श्रावणीयाः, व्यवहारस्य अनुकरणार्थं च ते प्रेरणीयाः ।*

दुःखितः अभवत् । स्वस्य चित्रं जनानां कृते अरुचिकरम् अभवत् इति विचार्य स हीनताबोधेन पीडितः सञ्जातः । स दुःखी भूत्वा गुरोः समीपम् अगच्छत्, गुरुं सर्वम् अकथयत् च । सर्वं श्रुत्वा गुरुः तम् अकथयत्, "भो शिष्य ! त्वं पुनः एकं तादृशमेव शोभनं चित्रं रचय । पुनः तथैव चित्रं मार्गस्थे अश्वत्थवृक्षमण्डपे स्थापय । तत्र त्रुटिं निर्देष्टुम् अनुरोधं न कुरु, त्रुटिं शोधयितुम् अनुरोधं कुरु । एवं करोषि चेत् त्वं यद् इच्छसि तदेव भवति" इति ।



चित्रकारः अपि गुरोः परामर्शानुसारं तथैव कृतवान् । सः पुनः मार्गस्थे अश्वत्थवृक्षमण्डपे तादृशमेव शोभनं चित्रम् स्थापितवान् । तत्रस्थां त्रुटिं शोधयितुं सः अनुरुद्धवान् । सायङ्काले चित्रकारः चित्रं द्रष्टुम् गतवान् । चित्रकारः चित्रे एकमपि चिह्नम्, एकमपि शोधनं न प्राप्तवान् । चित्रं यादृशं स्थापितम् आसीत्, तादृशमेव आसीत् । चित्रकारः आश्चर्यान्वितः सञ्जातः । सः रहस्यं ज्ञातुं पुनः गुरोः समीपम् अगच्छत्, गुरुं सर्वं यथातथम् अवर्णयत् च ।

गुरुः रहस्यमुद्घाटयन् अकथयत्, "भो शिष्य ! पूर्वं त्वं त्रुटिं निर्देष्टुम् अनुरुद्धवान् । अतः जनाः सूक्ष्माम् अपि त्रुटिम् अन्विष्य चिह्नं कृतवन्तः । परं द्वितीयवारं त्वं त्रुटिं शोधयितुम् अनुरुद्धवान् । त्रुटीनां शोधनात् निर्देशनं सरलं भवति, शोधनस्य ज्ञानं जनेषु न भवति । अतः जनाः त्रुटिं न शोधितवन्तः । जनाः अन्येषां त्रुटिं दर्शयितुम् उद्यताः भवन्ति, त्रुटिं दर्शयितुं सर्वे शक्नुवन्ति, परं त्रुटीनां शोधनं कर्तुं कः अपि समर्थो न भवति" इति । शिष्यः अपि रहस्यं श्रुत्वा जनानां स्वभावं ज्ञातवान् । समाजस्य समुन्नतये समस्यादर्शकानाम् न, समाधानस्य अन्वेषकाणाम् आवश्यकता वर्तते इति च स ज्ञातवान् ।

## अभ्यासः

### पाठानुशीलनम्

१. **शुद्धमुच्चारयत**

**अखण्डेन, तत्रस्थाम्, अश्वत्थवृक्षमण्डपे, अनुरुद्धवान्, आश्चर्यान्वितः, अन्वेषकाणाम् ।**

२. **शुद्धं कृत्वा लिखत**

**सोभनानि, अइच्छत्, दुखितः, त्रूटिम्, नीर्देसनम्, अन्येसाम् ।**

३. **पाठस्य द्वितीयम् अनुच्छेदं शिक्षकमुखात् श्रुत्वा लिखत ।**

४. **एकपदेन उत्तरयत**

(क) चित्रकारः जनेभ्यः किम् इच्छति स्म ?

(ख) चित्रकारः चित्रं कुत्र अस्थापयत् ?

(ग) प्रथमचित्रे कति चिह्नानि अङ्कितानि आसन् ?

(घ) द्वितीयचित्रे चित्रकारः कां शोधयितुम् अनुरुद्धवान् ?

(ङ) चित्रकारः किं ज्ञातुं गुरोः समीपम् अगच्छत् ?

५. **सङ्क्षेपेण उत्तरयत**

(क) प्रथमं चित्रं चित्रकारस्य कृते किमर्थम् अमूल्यम् आसीत् ?

(ख) चित्रकारः किमर्थं हीनताबोधेन पीडितः अभवत् ?

(ग) द्वितीयं चित्रं द्रष्टुं गतः चित्रकारः किमर्थम् आश्चर्यान्वितः सञ्जातः ?

(घ) त्रुटीनां शोधनात् किं सरलं भवति ?

(ङ) शिष्यः रहस्यं श्रुत्वा किं ज्ञातवान् ?

६. **'जनानां स्वभावः' इति विषये कथाम् आधृत्य एकम् अनुच्छेदं लिखत ।**

७. **सत्यम् असत्यं वा विवेचयत**

(क) चित्रकारः जनानां प्रतिक्रियानुसारं चित्रं शोधयति स्म ।

(ख) प्रथमचित्रे एकमपि चिह्नं न प्राप्तम् ।

(ग) गुरुः चित्रकारं चित्रं न निर्मातुम् आदिशत् ।

(घ) जनाः त्रुटीनां निर्देशनात् शोधनं कर्तुम् इच्छन्ति ।

(ङ) अद्य समाजस्य कृते समाधानस्य अन्वेषकाणाम् आवश्यकता वर्तते ।

८. **परस्परं मेलयत**

| | |
|---|---|
| चित्रकारः | त्रुटिं निर्देष्टुम् एव समर्थाः आसन् । |
| गुरुः | चित्रमेव अदृष्टं जातम् । |
| जनाः | जनेभ्यः प्रतिक्रियाम् ऐच्छत् । |
| चिह्नैः | चित्राणि अनाशयत् । |
| | जनानां स्वभावस्य रहस्यम् उद्घाटितवान् । |

९. **अधस्तनानि पदानि प्रयुज्य वाक्यानि रचयत**

**चित्राणि, विषये, आसन्, श्रुत्वा, समीपम् ।**

१०. **अधस्तनीम् लघुकथां पठित्वा तस्य आशयं स्फुटीकुरुत**



एकः बालकः मात्रा सह तिष्ठति स्म । सः आज्ञाकारी मातृभक्तश्च आसीत् । एकदा तस्य माता अस्वस्था अभवत् । बहूनि दिनानि यावत् सा स्वस्था न अभवत् । बालकः मातुः सेवां कृत्वा मातुः समीपे एव अतिष्ठत् । एकदा रात्रौ माता बालकं पेयं जलं याचितवती । बालकः जलम् आनेतुम् अगच्छत् । जलं गृहीत्वा बालकः मातुः समीपम् अगच्छत् । परं माता निद्रिता आसीत् । सः 'माता यदा जागर्ति, तदा जलं ददामि' इति विचारितवान् । जागरणस्य प्रतीक्षां कुर्वन् जागृतः सन् बालकः रात्रिं व्यतीतवान् । प्रातः माता जागृता अभवत् । सा स्वपुत्रं जलं हस्ते गृहीत्वा उत्थितम् अपश्यत्, स्नेहेन नेत्रे आर्द्रीकृत्य अकथयत् च, "किमर्थं त्वं जागृतः सन् रात्रिं यावद् उत्थितवान् ? एवं न करणीयम् । अस्वस्थः भविष्यसि ।" मातुः वचनं श्रुत्वा बालकः अकथयत्, "भवती मम कृते अनेकाः रात्रीः अनिद्रया एव व्यतीतवती चेद् भवत्याः कृते अहम् एकाम् अपि रात्रिम् अनिद्रितः भवितुं न शक्नोमि ?" इति ।

**११. अधस्तनं गद्यांशं पठित्वा प्रदत्तान् प्रश्नान् उत्तरयत**



एकस्य कृषकस्य चत्वारः पुत्राः आसन् । कृषकः वृद्धः आसीत् । स पुत्रेषु एकस्मै स्वस्य कार्यभारं दातुम् इच्छति स्म । अतः स एकदा चतुरः एव पुत्रान् आहूय पतिपुत्रम् एकमुष्टिपरिमितं धान्यं प्रायच्छत् । प्रथमः पुत्रः तद् एकमुष्टिपरिमितं धान्यं निरर्थकं मत्वा अक्षिपत् । द्वितीयः पुत्रः तद् धान्यम् अन्येषु धान्येषु मिश्रयित्वा तण्डुलान् अकरोत् । तृतीयः पुत्रः 'पिता कदाचिद् याचितुं शक्नोति' इति विचार्य तद् धान्यं सुरक्षितम् अस्थापयत् । चतुर्थः तद् धान्यं क्षेत्रे विकीर्य अधिकं

धान्यम् उदपादयत् । एतद् दृष्ट्वा कृषकः 'कनिष्ठः एव धान्यस्य उपयोगितां जानाति' इति विचार्य स्वस्य सर्वं कार्यभारं कनिष्ठाय अयच्छत् ।

**प्रश्नाः**

(क) वृद्धः किम् इच्छति स्म ?

(ख) वृद्धः पुत्रेभ्यः किम् अददात् ?

(ग) तृतीयः पुत्रः किमर्थं धान्यं सुरक्षितम् अस्थापयत् ?

(घ) चतुर्थः पुत्रः किम् अकरोत् ?

(ङ) वृद्धः किमर्थं कनिष्ठाय कार्यभारम् अयच्छत् ?

**१२. श्लोकयोः सरलार्थाधारेण क्रियाकलापान् कुरुत**

**शाश्वतोऽयं सदा धर्मः स्थितोऽस्माकं नरर्षभ ! ।**
**ज्येष्ठे त्वयि स्थिते रामे कनीयान् न भवेन्नृपः ॥**
**भवत्वविधवा भूमिस्त्वया पत्या समन्विता ।**
**शशिना विमलेनेह शारदी रजनी यथा ॥**

**सरलार्थः**

भरतः रामं प्रति वदति - हे नरश्रेष्ठ ! यावद् ज्येष्ठभ्राता जीवितः अस्ति कनिष्ठः भ्राता राजा भवितुं न अर्हति इति अस्माकं वंशस्य परम्परा वर्तते । अतः भवान् एव राजा भवतु इति भावः ।

हे भ्रातः ! भवान् अस्याः अयोध्याभूमेः प्रभुः अस्ति । यथा शरदृतौ विमलेन चन्द्रेण आकाशः प्रकाशितो भवति तथैव भवतः शासनेन एषा भूमिः सनाथा भविष्यति । अतः भवान् एव राजा भवतु ।

**(अ) एकपदेन उत्तरयत**

(क) ज्येष्ठ भ्राता कः अस्ति ?

(ख) कः राजा भवितुं नार्हति ?

(ग) रामः कस्याः प्रभुः अस्ति ?

(घ) शरदृतौ चन्द्रमा कीदृशः भवति ?

**(आ) पूर्णवाक्येन उत्तरयत**

(क) परम्परा कीदृशी अस्ति ?

(ख) भरतः कीदृशः भ्राता अस्ति ?

(ग) कः राजा भवतु ?

(घ) कीदृशेन चन्द्रेण रात्रिः प्रकाशयुक्ता भवति ?

## (इ) उचितम् (√) अनुचितं (×) वा चिनुत

(क) लक्ष्मणः रामं प्रति कथयति । ( )

(ख) रामः राजा भवितुं नार्हति । ( )

(ग) रामस्य नृपत्वेन अयोध्याभूमिः सनाथा भवतु । ( )

(घ) विमले आकाशे चन्द्रः प्रकाशयुक्तः भवति । ( )

(ङ) ज्येष्ठः भ्राताः राजा भवति इति परम्परा अस्ति । ( )

(च) भरतः अयोध्यायाः प्रभुः अस्ति । ( )

## व्यवहारानुशीलनम्

**१. 'परोपदेशे पाण्डित्यम्' इति विषये कक्षायां परामर्शं कुरुत ।**

**२. छात्राः समूहत्रये विभक्ताः भूत्वा तिष्ठन्तु । एकः समूहः अपरस्मै विवेकस्य प्रयोगार्थं समस्यां ददातु, अपरश्च समाधानम् ददातु । अनेनैव प्रकारेण प्रतिस्पर्धां कुर्वन्तु । अनन्तरं विजेतुः, उपविजेतुश्च नाम शिक्षकाद् घोषणां कारयन्तु ।**

**३. समुचिते विकल्पे चिह्नं (√) दत्त**

(क) भोजनसमये दीनः याचकः भोजनं याचति चेत् किं करोषि ?

(अ) द्वारं पिदधामि (आ) भोजनं ददामि (इ) तथैव प्रेषयामि

(ख) मार्गे कश्चन पतति चेतत्वं किं करोषि ?

(अ) उत्थापयामि (आ) उपहासं करोमि (इ) रोदिमि

(ग) नद्यां कश्चिद् अवकरान् क्षिपन् अस्ति चेत् किं करोषि ?

(अ) तस्य साहाय्यं करोमि (आ) तथा न कर्तुम् अनुरुणध्मि (इ) तं तर्जयामि

(घ) गृहात् निःसृतम् अवकरं किं करोषि ?

(अ) अवकरपात्रे क्षिपामि (आ) क्षेत्रे नीत्वा ज्वालयामि (इ) मार्गे क्षिपामि

# पाठः ९

प्रबन्धः

## चरित्रशक्तिः



संसारे बहुविधाः मानवाः निवसन्ति । तेषु सर्वेषां स्वभावः भिन्नः भवति । केचन धनम्, केचन मानम्, केचन च ज्ञानं कामयन्ते । तेषु धनार्जनाय यतमानानां जनानाम् एव बाहुल्यं दृश्यते । जनाः धनार्जनाय कठिनं श्रमं कुर्वन्ति । गृहं परित्यज्य विदेशेषु गच्छन्ति । आजीवनं धनस्य कृते धावन्तः जनाः आत्मशान्तये दानम्, समाजसेवां च कुर्वन्ति । अन्त्ये च त्यागेन एव शान्तिम् अनुभवन्ति ।

उपरिष्टाद् अवलोक्यमाने समाजे धनिनः एव अधिकं प्रतिष्ठिताः दृश्यन्ते । किन्तु वास्तविकता तादृशी नास्ति । धनं तु क्षणिकम्, विनाशशीलं च भवति । धनेन लब्धा प्रतिष्ठा शीघ्रं विनश्यति । ज्ञानेन, सदाचारेण च लब्धा प्रतिष्ठा शाश्वती भवति । धनिकाः स्वस्य समाजे एव प्रतिष्ठिताः भवन्ति, किन्तु ज्ञानिनः सर्वत्र पूजिताः भवन्ति । ज्ञानम् अपि स्वतः एव न लभ्यते । ज्ञानस्य कृते सदाचारः आवश्यकः भवति । सदाचारः एव शीलम् इति कथ्यते ।

धनेन भौतिकं सौविध्यं तु लभ्यते किन्तु वास्तविकी शान्तिः न लभ्यते । अत एव उच्यते - 'धनेन औषधं तु लभ्यते, नीरोगिता न । शय्या लभ्यते, निद्रा न । भोजनं लभ्यते, क्षुधा न' इत्यादि । निर्धनः अपि नरः स्वस्थः सदाचारी च वर्तते चेत् तस्य जीवने सर्वदा शान्तिः भवति । अत एव नैपालकः महाकविः लक्ष्मीप्रसादः मनसि प्रसन्ने वन्यशाकानां भक्षणेन अपि परमा शान्तिः मिलति इति उपदिष्टवान् । यद्यपि धनम् आवश्यकम् एव नास्तीति न । किन्तु कियद् धनं सुखदायकम् ?

*शिक्षणालोकः*
*प्रकाशिताः प्रबन्धाः सङ्कलय्य कक्षायां श्रावणीयाः, व्यवहारस्य अनुकरणार्थं च ते प्रेरणीयाः ।*

इति विषये जनाः भ्रान्ताः इव दृश्यन्ते । यावता धनेन अस्माकं आजीविका सरलतया प्रचलति तावद् एव धनम् आनन्दकारकं भवति । अधिकं धनं तु विषादस्य हेतुः भवति ।

अस्माकं जन्मभूमिः बुद्धभूमिः अस्ति । शान्तिदूतः गौतमबुद्धः धनस्य कारणेन न, ज्ञानेन, शीलेन च विश्वस्मिन् पूजितः विद्यते । स राज्यसुखं परित्यज्य शान्तेः अन्वेषणं विहितवान् । अन्त्ये च पञ्चशीलानाम् उपदेशं व्यदधात् । एतेन वित्तम् न, शीलम् एव सन्तोषकारकम् इति सिद्धं भवति । दुराचारः मानवः धनेन परिपूर्णः अपि लोके निन्दितः भवति । सदाचारी, सुशीलः च जनः निर्धनः अपि सर्वैः प्रशस्यते ।

जनाः धनार्जनाय अनेकानि दुष्कृत्यानि कुर्वन्ति । किन्तु शास्त्राणि धर्मपूर्वकं धनार्जनाय एव निर्दिशन्ति । ज्ञानेन, सदाचारेण च पूर्णाः अस्माकं पूर्वजाः महर्षयः अद्यापि प्रतिदिवसं स्मर्यन्ते । राजानः अपि जनकादयः ज्ञानवन्तः एव स्मर्यन्ते, धनवन्तः न । अतः शास्त्रेषु 'वित्तं यत्नेन संरक्षेत् वित्तमेति च याति च' इति उपदिष्टं वर्तते । अतः 'शीलं सर्वत्र वै धनम्' इति वाक्यं संस्मृत्य अस्माभिः सदाचारस्य पालना विधेया । स्वस्य परिवारे, समाजे च सदाचारस्य विकासाय यत्नः विधेयः ।

## अभ्यासः

### पाठानुशीलनम्

१. **पाठं सस्वरं वाचयत ।**

२. **शुद्धम् उच्चारयत**

**आत्मशान्तये, अवलोक्यमाने, वास्तविकी, भ्रान्ताः, सन्तोषकारकम्**

३. **समुचितम् उत्तरं उत्तरपुस्तिकायां लिखत**

(क) कीदृशानां जनानाम् बाहुल्यं दृश्यते ?

(अ) ज्ञानाय संलग्नानाम्　(आ) धनार्जनाय यतमानानाम्　(इ) उद्योगिनाम्

(ख) अन्त्ये जनाः कथं शान्तिम् अनुभवन्ति ?

(अ) लोभेन　(आ) हिंसया　(इ) त्यागेन

(ग) ज्ञानस्य कृते किम् आवश्यकम् भवति ?

(अ) तिरस्कारः　(आ) सदाचारः　(इ) परोपकारः

(घ) धनेन किम् लभ्यते ?

(अ) सौविध्यम् (आ) शान्तिः (इ) नीरोगिता

(ङ) कीदृशः पुरुषः निन्दितः भवति ?

(अ) सदाचारी (आ) सज्जनः (इ) दुराचारः

**४. उत्तराणि लिखत**

(क) जनाः आत्मशान्तये किं किं कुर्वन्ति ?

(ख) कीदृशी प्रतिष्ठा शीघ्रं विनश्यति ?

(ग) केन लब्धा प्रतिष्ठा शाश्वती भवति ?

(घ) धनेन किं किं लभ्यते, किं किं च न लभ्यते ?

(ङ) कियद् धनम् आनन्दकारकं भवति ?

(च) गौतमबुद्धः केन कारणेन जगति पूजितः विद्यते ?

(छ) कीदृशाः राजानः स्मर्यन्ते ?

(ज) अस्माभिः किमर्थं यत्नः विधेयः ?

**५. अधस्तनं श्लोकं पठित्वा शिक्षकस्य सहयोगेन अभिवादनस्य महत्त्वं वर्णयत**

**अभिवादनशीलस्य नित्यं वृद्धोपसेविनः ।**
**चत्वारि तस्य वर्धन्ते आयुर्विद्या यशो बलम् ॥**

**६. परस्परं योजयत**

| | |
|---|---|
| धनम् | सर्वत्र पूजिताः भवन्ति । |
| दुराचारी | प्रशंसनीयः भवति । |
| ज्ञानिनः | बुद्धभूमिः अस्ति । |
| नेपालः | विनाशशीलम् भवति । |
| | निन्दितः भवति । |

**७. अधस्तनं वाक्यं शुद्धं कृत्वा उत्तरपुस्तिकायां लिखत**

**शान्तिदुतो गौतमवुद्धः धनस्य कारणेन न ज्ञानेन, शिलेन च विश्वस्मिन् पुजितो बिद्यते ।**

**८. अधस्तनपदानि प्रयुज्य अनुशासनस्य विषये एकम् अनुच्छेदं रचयत**

गच्छन्ति, अधिकम्, विनश्यति, निर्धनः, परित्यज्य, दुष्कृत्यानि, विधेयः

**९. ज्ञानं शीलं वा श्रेयः इति विषये कक्षायां विमर्शं कुरुत ।**

**१०. अधस्तनं गद्यांशं पठित्वा प्रदत्तान् प्रश्नान् उत्तरयत**

प्राचीनकाले गुरुकुलीना शिक्षा आसीत् । जनाः गुरुकुलं गत्वा गुरोः सेवां कृत्वा शिक्षाम् अर्जयन्ति स्म । गुरोः सेवया, साधनया च शनैः शनैः शिक्षां प्राप्नुवन्ति स्म । अधुना शिक्षा विद्यालयेभ्यः महाविद्यालयेभ्यः विश्वविद्यालयेभ्यः च गृह्यते । अतः आधुनिकाः विद्यालयीयां शिक्षाम् एव शिक्षारूपेण गृह्णन्ति । वस्तुतः शिक्षा समाजस्य विकासाय एव भवति । परं भौतिकरूपेण समृद्धः अपि यदि नैतिकरूपेण समृद्धः न भवति, तर्हि विकासः विनाशाय भवति । अतः अधुना अर्थकर्या शिक्षया सह नैतिकी शिक्षा अपि प्रदेया । नैतिक्या शिक्षया विना समाजः अमर्यादितः भवति, मर्यादारहितः समाजः शीघ्रं विनश्यति । अतः शिक्षायां नीतेः अतीव महत्त्वं भवति ।

**प्रश्नाः**

(क) प्राचीनकाले जनाः कथं शिक्षाम् अर्जयन्ति स्म ?

(ख) अधुना शिक्षा केभ्यः गृह्यते ?

(ग) शिक्षायाः प्रयोजनं किम् ?

(घ) कस्याम् अवस्थायां विकासः विनाशाय भवति ?

(ङ) किमर्थं शिक्षायां नीतेः महत्त्वं भवति ?

**११. श्लोकयोः सरलार्थाधारेण क्रियाकलापान् कुरुत**

**नमामि शुभ्रवर्णं तं चन्द्रालङ्कारभूषितम् ।**
**सुपूजितं देवगणैः शम्भुं डिण्डिमवादकम् ॥**
**कल्याणस्य च सत्यस्य सौन्दर्यस्य च हेतवे ।**
**आशुतोषाय शान्ताय पार्वत्याः पतये नमः ॥**

**सरलार्थः**

शिवस्य वर्णः गौरः अस्ति । शिरसि शोभमानः चन्द्रः तस्य भूषणम् अस्ति । स डमरुं वादयति ।

इन्द्रादिभिः देवैः अपि स सम्यक् पूजितः अस्ति । अहं तादृशं शिवं नमामि ।

शिवः भक्तानां कल्याणं करोति । सः सत्यमार्गे तान् प्रेरयति । सौन्दर्यं प्राप्तुं च भक्ताः तं प्रार्थयन्ति । स शीघ्रं प्रसीदति । तस्य स्वरूपं शान्तम् अस्ति । स देव्याः पार्वत्या भर्ता अस्ति । तादृशाय देवाय मम (भक्तस्य) नमः ।

**(अ) एकपदेन उत्तरयत**

(क) कः डमरुं वादयति ?

(ख) अहं शिवं किं करोमि ?

(ग) शिवः केषां कल्याणं करोति ?

(घ) कस्य वर्णः गौरः अस्ति ?

**(आ) पूर्णवाक्येन उत्तरयत**

(क) चन्द्रः कस्य शिरसः भूषणम् ?

(ख) शिवः कुत्र भक्तान् प्रेरयति ?

(ग) शिवस्य स्वरूपं कीदृशम् अस्ति ?

(घ) शिवः कदा प्रसीदति ?

**(ग) उचितम् (√) अनुचितं (×) वा निर्दिशत**

(क) शिवस्य शिरसि सूर्यः अस्ति ( )

(ख) इन्द्रादयः देवाः शिवं पूजयन्ति । ( )

(ग) शिवः गौरवर्णः अस्ति । ( )

(घ) शिवस्य पत्नी पार्वती अस्ति । ( )

(ङ) शिवः शीघ्रं प्रसन्नः न भवति । ( )

(च) शिवः भक्तानां कल्याणं करोति । ( )

(छ) जनः सुन्दरः भवितुं तं न प्रार्थयति । ( )

(ज) शिवस्य स्वरूपं शान्तम् अस्ति । ( )

**१२. सस्वरवाचनं कृत्वा सखिभिः सह विमृशत**

को न शृणोति श्रीमद्भगवद्गीतायाः नाम जगति ? ग्रन्थोऽयं महाभारतस्य अंशरूपो वर्तते । महाभारतस्य युद्धाय ख्यातनामानो वीराः सन्नद्धा आसन् । तत्र अर्जुनोऽपि तत्पर आसीत् । स युद्धे स्वबान्धवान् अपश्यत् । तान् दृष्ट्वा अर्जुनो युद्धाद् विमुखोऽभवत् । तदैव श्रीकृष्णोऽर्जुनं सन्मार्गं दर्शयितुं तस्मै उपदेशमयच्छत् । श्रीकृष्णस्य तस्य उपदेशस्य नाम एव श्रीमद्भगवद्गीता वर्तते । गीता जीवने मार्गदर्शनं करोति । गीतादर्शनं सर्वत्र प्रशंसितमस्ति । उक्तञ्च- "गीता दुग्धामृतं महत्" इति ।

## व्यवहारानुशीलनम्

**१. सदाचारिणं भवितुं के गुणाः आवश्यकाः भवन्ति ? सूचीं निर्मात ।**

**२. स्वस्य समाजे वर्तमानस्य कस्यचन सदाचारिणः मानवस्य विषये कक्षायां वर्णनं कुरुत ।**

**३. स्वविवेकं प्रयुज्य तालिकां पूरयत**

दीनसेवा, ईर्ष्या, चौर्यम्, सज्जनसङ्गतिः, सत्यभाषणम्, अहिंसा, लोभः, कलहः, समाजसेवा, परनिन्दा

| सदाचाराः | दुराचाराः |
|---|---|
| | |

## पाठः १०

नीतिपद्यम्

# उद्योगमहत्त्वम्

न दैवमिति सञ्चिन्त्य त्यजेदुद्योगमात्मनः ।
अनुद्योगेन तैलानि तिलेभ्यो नाप्तुमर्हति ॥
यथा तैलक्षयाद् दीपः प्रह्रासमुपगच्छति ।
तथा कर्मक्षयाद् दैवं प्रह्रासमुपगच्छति ॥
प्रारभ्यते न खलु विघ्नभयेन नीचैः
प्रारभ्य विघ्नविहता विरमन्ति मध्याः ।
विघ्नैः पुनः पुनरपि प्रतिहन्यमानाः
प्रारभ्य चोत्तमजना न परित्यजन्ति ॥

**प्रथमः श्लोकः**

**पदच्छेदः**

न, दैवम्, इति, सञ्चिन्त्य, त्यजेत्, उद्योगम्, आत्मनः, अनुद्योगेन, तैलानि, तिलेभ्यः, न, आप्तुम्, अर्हति ।

**सरलार्थः**

भाग्यं वर्तते चेत् प्राप्यते नो चेत् न प्राप्यते इति विचार्य केन अपि स्वपरिश्रमः न त्यक्तव्यः । यतः तिलेभ्यः अपि तैलानि स्वयमेव न आपतन्ति, तैलार्थं तत्र उद्योगः आवश्यकः भवति ।

**द्वितीयः श्लोकः**

**पदच्छेदः**

यथा, तैलक्षयात्, दीपः, प्रह्रासम्, उपगच्छति, तथा, कर्मक्षयात्, दैवम्, प्रह्रासम्, उपगच्छति ।

***शिक्षणालोकः***

*भाग्यात् परिश्रमं प्रति नियोजयितुं प्रेरणाप्रदायिनां श्लोकानां सङ्कलनार्थम्, तेषाम् अर्थकरणार्थं च छात्राः प्रेरयितव्याः ।*

**सरलार्थः**

यथा तैलस्य क्षयेण दीपः प्रकाशमानः न भवति, तथा कर्मणः क्षयेण भाग्यं सुदृढं न भवति । भाग्यनिर्माणाय कर्म आवश्यकम् अस्ति । कर्मणा एव सफलता प्राप्यते ।

## तृतीयः श्लोकः

**पदच्छेदः**

प्रारभ्यते, न, खलु, विघ्नभयेन, नीचैः, प्रारभ्य, विघ्नविहताः, विरमन्ति, मध्याः, विघ्नैः, पुनः, पुनः, अपि, प्रतिहन्यमानाः, प्रारभ्य, च, उत्तमजनाः, न, परित्यजन्ति ।

**सरलार्थः**

मनुष्यः त्रिविधः भवति - नीचः, मध्यमः, उत्तमश्च । नीचः मनुष्यः कार्यात् प्राग् एव विघ्नान् दृष्ट्वा कार्यं न प्रारभते । मध्यमः मनुष्यः कार्यं प्रारभते परं विघ्ने आपतिते मध्ये एव कार्यं त्यजति, पुनः न करोति । उत्तमः मनुष्यः तु पुनः पुनः विघ्नेषु आपतितेषु अपि कार्यं न परित्यजति, येन केन अपि उपायेन कार्यं सम्पादयति एव ।

## अभ्यासः

### पाठानुशीलनम्

१. **पाठस्थानां श्लोकानां शुद्धतया वाचनं कुरुत ।**

२. **पाठस्य तृतीयं श्लोकं शिक्षकस्य मुखात् श्रुत्वा लिखत ।**

३. **सङ्क्षेपेण उत्तरयत**

(क) जनः किमर्थम् आत्मनः उद्योगं न त्यजेत् ?

(ख) तैलं कथं प्राप्यते ?

(ग) दीपः कथं प्रह्रासमुपगच्छति ?

(घ) कर्मक्षयात् किं भवति ?

(ङ) नीचः किमर्थं कार्यं न प्रारभते ?

(च) मध्यमः किं करोति ?

(छ) उत्तमः कः अस्ति ?

४. **शुद्धं कृत्वा लिखत**

**सन्चिन्त्य, उध्योगः, अऱ्हति, पर्हासम्, निचैः, प्रारम्भ्य, प्रतिहण्यमानाः, परीत्यजन्ती ।**

५. **श्लोकांशान् परस्परं मेलयत**

| | |
|---|---|
| न दैवमिति सञ्चिन्त्य | प्रह्रासमुपगच्छति |
| अनुद्योगेन तैलानि | प्रह्रासमुपगच्छति |
| यथा तैलक्षयाद् दीपः | पण्डिताः समदर्शिनः |
| तथा कर्मक्षयाद् दैवं | त्यजेदुद्योगमात्मनः |
| | तिलेभ्यो नाप्तुमर्हति |

६. **अधस्तनानि पदानि प्रयुज्य वाक्यानि रचयत**

**दैवम्, त्यजेत्, आत्मनः, तैलानि, आप्तुम्, दीपः, उपगच्छति, कर्मक्षयात्, प्रारभ्य, विरमन्ति, पुनः, उत्तमजनाः ।**

७. **समीचीनकथने 'आम्', असमीचीनकथने च 'न' इति लिखत**

(क) भाग्यं विश्वस्य कर्म न कर्तव्यम् ।

(ख) तिलेभ्यः तैलं न प्राप्यते ।

(ग) कर्मणा भाग्यं सुदृढं भवति ।

(घ) नीचः कार्यं न प्रारभते ।

(ङ) मध्यमः मध्ये कार्यं त्यजति ।

८. **श्लोकं पठित्वा 'उद्योगस्य महत्त्वम्' इति विषये एकम् अनुच्छेदं लिखत**

**उद्योगेन हि सिध्यन्ति कार्याणि न मनोरथैः ।**

**न हि सुप्तस्य सिंहस्य प्रविशन्ति मुखे मृगाः ॥**

९. **शिक्षकस्य सहयोगेन नेपालीभाषायां सरलार्थं लिखत**

**जलबिन्दुनिपातेन क्रमशः पूर्यते घटः ।**

**स हेतुः सर्वविद्यानां धर्मस्य च धनस्य च ॥**

१०. **अधस्तनं श्लोकं पठित्वा प्रदत्तान् प्रश्नान् उत्तरयत**

**शुभेन कर्मणा सौख्यं दुःखं पापेन कर्मणा ।**

**कृतं भवति सर्वत्र नाकृतं विद्यते क्वचित् ॥**

**प्रश्नाः**

(क) कीदृशेन कर्मणा सुखं प्राप्यते ?

(ख) पापेन कर्मणा किं प्राप्यते ?

(ग) कीदृशं कर्म फलितं भवति ?

(घ) किं क्वचिद् अपि न विद्यते ?

**१०. मञ्जूषायाः सहयोगेन सङ्क्षेपेण चित्रवर्णनं कुरुत**



**क्षेत्रे, महिलाः, बीजानि, पर्यावरणम्, सुन्दरम्, पुरुषः, परिश्रमः, हलेन, रोपयन्ति, कर्षति, विद्यते, फलति**

११. कथां पठित्वा प्रश्नान् उत्तरयत

## विद्यावान् बुद्धिमान् भवेत्



कस्मिँश्चित् नगरे चत्वारः सखायः आसन् । तेषु त्रयः शास्त्राणि अधीतवन्तः तथापि बुद्धिरहिताः आसन् । एकः अपठितः अपि बुद्धिमान् आसीत् । एकदा ते सर्वे अपि धनम् अर्जयितुं देशान्तरं प्रति अगच्छन् । वनमार्गेण गताः ते एकस्मिन् स्थाने मृतस्य सिंहस्य अस्थीनि अपश्यन् । तदा ते त्रयः अचिन्तयन्, "वयं सम्प्रति अस्माकं विद्यायाः प्रायोगिकं परीक्षणं कुर्मः" इति ।

ततः तेषु मध्ये एकः स्वस्य विद्याप्रयोगेण सिंहस्य अस्थिशरीरम् अरचयत् । द्वितीयः तस्मिन् शरीरे रक्तमांसादिकम् असृजत् । तृतीयः शास्त्रज्ञः तं सिंहं जीवितं कर्तुम् उद्यतः अभवत् । तदा शास्त्रज्ञानरहितः चतुर्थः सावधानम् अकरोत् यत्, "यदि एषः सिंहः जीवति चेत् अस्मान् मारयति" इति ।

परन्तु तृतीयः सः प्रत्यवदत्, "मूर्ख ! त्वं मौनी भव । अहं स्वस्य विद्यायाः परीक्षणम् अवश्यं करोमि" इति । तदा चतुर्थः झटिति एकं वृक्षं समारोहत् । विद्याप्रयोगेण सिंहः पुनर्जीवितः अभवत्, तान् त्रीन् च अखादत् । सिंहः नरभोजनेन तृप्तः भूत्वा ततः अगच्छत् । अनन्तरं सः बुद्धिमान् चतुर्थः वृक्षाद् अवतीर्य स्वगृहं प्रति अगच्छत् । अतः एव विद्वांसः कथयन्ति, "विद्यावान् बुद्धिमान् भवेत्" इति ।

**(अ) एकपदेन प्रश्नान् उत्तरयत**

(क) मित्रेषु कति जनाः शास्त्राणि अधीतवन्तः ?

(ख) एकः अपठितः अपि कीदृशः आसीत् ?

(ग) एकदा ते सर्वे कुत्र अगच्छन् ?

(घ) ते केन मार्गेण गताः ?

**(आ) पूर्णवाक्येन प्रश्नान उत्तरयत**

(क) ते कुत्र सिंहस्य अस्थीनि अपश्यन् ?

(ख) तृतीयः शास्त्रज्ञः किं प्रत्यवदत् ?

(ग) केन सिंहः पुनर्जीवितः अभवत् ?

(घ) विद्वासः किं कथयन्ति ?

**१२. अधोलिखितम् अनुच्छेदं पठित्वा प्रश्नान् उत्तरयत**

कस्यचित् धनिकस्य गृहाद् बहिः भिक्षुकः आसीत् । स श्रुतवान् - देव ! महयम् पुत्रं ददातु । अहो ! अयम् तु स्वयमेव याचकः इति चिन्तयित्वा भिक्षुकः अग्रे प्रस्थितः । अन्यस्मिन् गृहे एकः वणिक् प्रार्थयते स्म- भगवति ! मम व्यापारे लाभः भवतु । भिक्षुकः चिन्तितवान्, "अरे ! एते तु महत्तरां भिक्षां याचन्ते । अहं तु केवलं भोजनं याचे । अहम् एव भाग्यवान् यतः अहं सन्तुष्टः अस्मि ।"

**प्रश्नाः**

(क) भिक्षुकः किं याचते स्म ?

(ख) भगवतीं कः प्रार्थयते स्म ?

(ग) 'अहम् एव भाग्यवान्' इति कः चिन्तयति ?

**१३. अधोलिखितौ श्लोकौ पठित्वा प्रश्नान् उत्तरयत**

**किं कुलेन विशालेन शीलमेवात्र कारणम् ।**
**कृमयः किं न जायन्ते कुसुमेषु सुगन्धिषु ॥**
**य इच्छत्यात्मनः श्रेयः प्रभूतानि सुखानि च ।**
**न कुर्यादहितं कर्म स परेभ्यः कदापि च ॥**

**प्रश्नाः**

(क) अत्र किं कारणम् ?

(ख) कुसुमेषु के जायन्ते ?

(ग) जनः कस्य श्रेयः इच्छति ?

(घ) जनः कीदृशं कर्म न कुर्यात् ?

## व्यवहारानुशीलनम्

१. तुभ्यम् अलसस्य परिश्रमिणः वा दिनचर्या रोचते ? यस्य रोचते तस्य दिनचर्यायाः सूचीं निर्माहि ।

२. त्वम् अध्ययने सफलतां प्राप्तुं किं किं करोषि ? लिखित्वा शिक्षकं दर्शय ।

३. समुचिते विकल्पे चिह्नं (√) दत्त

(क) त्वं विद्यालयात् गृहं गत्वा किं करोषि ?

(अ) स्वपिमि (आ) किमपि न करोमि (इ) गृहकार्यं करोमि

(ख) पित्रोः कार्यसमये त्वं किं करोषि ?

(अ) तयोः साहाय्यं करोमि (आ) दूरे स्थित्वा पश्यामि (इ) कार्यस्य प्रशंसां करोमि

(ग) कः सफलतां प्राप्नोति ?

(अ) उद्योगी (आ) निद्रालुः (इ) अलसः

(घ) त्वम् कीदृशः असि ?

(अ) परिश्रमी (आ) वाचालः (इ) अलसः

नीतिकथा

# वर्जयेत् दुर्जनं मित्रम्

मगधदेशे एकं घनं वनम् आसीत् । तस्मिन् वने चिरकालात् स्नेहपूर्वकं मृगकाकौ निवसतः स्म । मृगस्य नाम चित्राङ्गः आसीत्, काकस्य नाम सुबुद्धिः आसीत् । कश्चित् शृगालः तं मृगं दृष्ट्वा अचिन्तयत्, "अहो ! एष मृगः हृष्टपुष्टः पीनश्च अस्ति, कथम् एतस्य मांसं भक्षयामि ? भवतु पूर्वं विश्वासम् उत्पादयामि ।" एवं चिन्तयित्वा शृगालः मृगस्य समीपम् अगच्छत्, अकथयत् च,

शृगालः - मित्र ! कुशलम् अस्ति ?

मृगः - त्वं कः असि ?

शृगालः - अहं क्षुद्रबुद्धिनामकः शृगालः अस्मि । अस्मिन् वने एकाकी तिष्ठामि ।

मृगः - किमर्थम् आगतः असि ?


शृगालः - अत्र मम मित्रं नास्ति, अतः त्वया सह मैत्रीं कर्तुम् इच्छामि । किं त्वं मम मित्रं भवसि ?

मृगः - किमर्थं न भवामि ? अवश्यमेव भवामि ।

एवं विश्वासम् उत्पाद्य शृगालः मृगेण सह चलितुम् आरभत । सायङ्काले तौ मृगस्य वासस्थानम् अगच्छताम् । अपरिचितेन शृगालेन सह मृगस्य मैत्रीं दृष्ट्वा काकः असन्तुष्टः अभवत् । तथापि मृगस्य इच्छानुसारं सः मौनः अभवत् । ततः प्रतिदिनं शृगालः अपि मृगेण सह एव चलितुम् आरभत ।

एकदा शृगालः मृगम् अकथयत्, "मित्र ! एतस्य वनस्य एकस्मिन् प्रान्ते धान्यस्य क्षेत्रम् अस्ति । त्वां तत्र नीत्वा अहं तत् क्षेत्रं दर्शयामि । ततः त्वं प्रतिदिनं तत्र गत्वा धान्यं खाद ।" एवं श्रुत्वा मृगः अपि प्रसन्नः अभवत् । स शृगालम् अन्वगच्छत्, धान्यम् अखादत् च । अनन्तरं स प्रतिदिनं तत्र गत्वा धान्यं खादितुम् आरभत । क्षेत्रपतिः धान्यानां तादृशीम् अवस्थां विलोक्य एकदा क्षेत्रे

*शिक्षणालोकः*
*सन्मित्रस्य विषये लिखिताः कथाः श्रावयित्वा विद्यार्थिनः सदाचरणाय प्रेरणीयाः ।*



पाशम् अस्थापयत् । तस्मिन् दिने यदा मृगः क्षेत्रं प्राविशत्, तदा एव स पाशेन बद्धः अभवत् । एवं दृष्ट्वा शृगालः अचिन्तयत्, "मम योजना सफला जाता, मम इच्छा च अद्य पूर्णा भविष्यति । क्षेत्रपतिः एतं मारयिष्यति । अस्य मांसरक्तलिप्तानि अस्थीनि अहं प्राप्स्यामि ।"

**शृगालं दृष्ट्वा मृगः अकथयत्, "अरे मित्र ! मम पाशं छित्त्वा मां रक्ष । यतः -**

**उत्सवे व्यसने चैव दुर्भिक्षे शत्रुविग्रहे ।**
**राजद्वारे श्मशाने च यस्तिष्ठति स बान्धवः ॥"**

मृगस्य कथनं श्रुत्वा शृगालः अकथयत्, "मित्र ! पाशः स्नायुना निर्मितः अस्ति । अद्य भौमवासरे अहं मांसं न खादामि । अतः तव पाशं छेत्तुं न शक्नोमि । श्वः प्रातः काले तव पाशं छेत्स्यामि ।"

मृगः शृगालस्य मनोरथं ज्ञात्वा अचिन्तयत्, "अपरिचितेन सह मैत्रीं कृत्वा अहं समीचीनं न कृतवान् ।"

सायङ्कालं यावद् अपि मृगः वासस्थानं न आगच्छत् । अतः काकः चिन्तितः सन् इतस्ततः मृगम् अन्विषन् तत्र प्राप्तवान् । मृगं पाशबद्धं दृष्ट्वा चिन्तितः अपि स किमपि कर्तुं न अशक्नोत् । रात्रिः तथैव व्यतीता । प्रातः यदा क्षेत्रपतिः दण्डं गृहीत्वा आगच्छत्, तदा काकस्य योजनानुसारं मृगः मृतवद् अतिष्ठत् । काकश्च तस्य चक्षुषि चञ्च्वा किमपि लिखन् इव अतिष्ठत् । क्षेत्रपतिः मृगं मृतं मत्वा पाशात् अमुञ्चत् । तदनन्तरं काकः शब्दम् अकरोत्, मृगश्च उत्थाय शीघ्रं पलायितवान् । तद् दृष्ट्वा कुपितः क्षेत्रपतिः मृगं दण्डेन प्राहरत्, परं दण्डः शृगालस्य उपरि अपतत् । तेन शृगालः मारितः । अतः कथ्यते -

**परोक्षे कार्यहन्तारं प्रत्यक्षे प्रियवादिनम् ।**
**वर्जयेत् तादृशं मित्रं विषकुम्भं पयोमुखम् ॥**

### प्रथमः श्लोकः

**पदच्छेदः**

उत्सवे, व्यसने, च, एव, दुर्भिक्षे, शत्रुविग्रहे, राजद्वारे, श्मशाने, च, यः, तिष्ठति, सः, बान्धवः ।

**सरलार्थः**

बान्धवः स भवति, यः उत्सवे, व्यसने, दुर्भिक्षे, शत्रुबन्धे, राज्ञः द्वारे, श्मशाने च सह एव तिष्ठति अर्थात् सुखावस्थायां, दुःखावस्थायां च यः नरः सहैव स्थित्वा सहायतां करोति, स वस्तुतः बान्धवः अस्ति ।

### द्वितीयः श्लोकः

**पदच्छेदः**

परोक्षे, कार्यहन्तारम्, प्रत्यक्षे, प्रियवादिनम्, वर्जयेत्, तादृशम्, मित्रम्, विषकुम्भम्, पयोमुखम् ।

**सरलार्थः**

कोऽपि आत्मनः परोक्षे स्वकीयं कार्यं विनाशयति, अग्रे च प्रियं सम्भाषते चेत् सः तस्मिन् एव क्षणे त्यक्तव्यः । यतः एतादृशः सखा मुखे पयसा भरितः, अन्तः च विषव्याप्तः घटः इव भवति ।

## अभ्यासः

### पाठानुशीलनम्

१. **पाठस्थानां श्लोकानां लयपूर्वकं पठनं कुरुत ।**

२. **शुद्धम् उच्चारयत**

हृष्टपुष्टः, चिन्तयित्वा, उत्पाद्य, शृगालेन, दृष्ट्वा, मैत्रीम् ।

३. **एकपदेन उत्तरयत**

(क) मृगस्य नाम किम् आसीत् ?

(ख) कः मृगम् अपश्यत् ?

(ग) शृगालस्य नाम किम् आसीत् ?

(घ) वनस्य प्रान्ते किम् अस्ति ?

(ङ) कः क्षेत्रे पाशम् अस्थापयत् ?

(च) शृगालः 'कस्मिन् वासरे मांसं न खादामि' इति अकथयत् ?

(छ) दण्डेन कः मारितः ?

४. **एकवाक्येन उत्तरयत**

(क) मृगः कीदृशः आसीत् ?

(ख) मृगं दृष्ट्वा शृगालः किम् अचिन्तयत् ?

(ग) किमर्थं काकः असन्तुष्टः अभवत् ?

(घ) क्षेत्रपतिना मृगे मारिते शृगालः किं किं प्राप्नोति ?

(ङ) कः बान्धवः अस्ति ?

(च) शृगालस्य मनोरथं ज्ञात्वा मृगः किम् अचिन्तयत् ?

(छ) नरः कीदृशं मित्रं वर्जयेत् ?

५. **समीचीनकथने 'आम्', असमीचीनकथने च 'न' इति लिखत**

(क) काकस्य नाम दुर्बुद्धिः आसीत् ।

(ख) शृगालः मृगेण सह वास्तविकी मैत्रीं कर्तुम् इच्छति स्म ।

(ग) अपरिचितेन सह मैत्री समीचीना न भवति ।

(घ) धान्यं खादितुं मृगः काकेन सह अगच्छत् ।

(ङ) काकस्य शब्दं श्रुत्वा मृगः न पलायितवान् ।

## ६. परस्परं मेलयत

| | |
|---|---|
| मृगः | धान्यानाम् अवस्थां दृष्ट्वा चिन्तितः अभवत् । |
| काकः | घनम् आसीत् । |
| शृगालः | शृगालेन सह मैत्रीम् अकरोत् । |
| क्षेत्रपतिः | मृगस्य नेत्रे किमपि अलिखत् । |
| वनम् | गृहं मार्जयति । |
| | वने एकाकी तिष्ठति । |

## ७. शुद्धं कृत्वा लिखत

**आसित्, येकाकी, श्रीगालः, श्मसाने, व्यतिता, चक्षूषि ।**

## ८. अधस्तनानि पदानि प्रयुज्य वाक्यानि रचयत

**वनम्, दृष्ट्वा, अगच्छत्, सह, पूर्णा, गृहीत्वा ।**

## ९. अधस्तनस्य श्लोकस्य आशयं स्फुटीकुरुत

**परोक्षे कार्यहन्तारं प्रत्यक्षे प्रियवादिनम् ।**

**वर्जयेत् तादृशं मित्रं विषकुम्भं पयोमुखम् ॥**

## १०. अधोलिखितं प्रसङ्गं पठित्वा अस्य सन्देशं स्वशब्दैर्लिखत

एकस्मिन् वने हंसकाकौ आस्ताम् । तयोः मैत्री आसीत्, परं हंसः गम्भीरस्वभावः आसीत् चेत् काकः चञ्चलस्वभावः आसीत् । तौ एकस्मिन् वृक्षे स्थित्वा वार्तालापं कुर्वन्तौ आस्ताम् । आखेटक्रीडया श्रान्तः कश्चिद् राजा तस्यैव वृक्षस्य छायायाम् आगत्य अवसत् । तं दृष्ट्वा चञ्चलः काकः राज्ञः शिरसि पुरीषम् अकरोत् । एतेन कुपितः राजा काकं लक्षयित्वा शरेण प्राहरत् । चञ्चलः काकः ततः उड्डीय अन्यत्र एव अगच्छत् । बाणेन हंसः मारितः ।

## ११. अधस्तनं गद्यांशं पठित्वा प्रदत्तान् प्रश्नान् उत्तरयत



तारुकाग्रामस्य पूर्वदिशि रामनारायणस्य गृहम् आसीत् । स षष्ठ्यां कक्षायां पठति स्म । स प्रायेण मित्राणि प्रति दुर्वचनं वदति स्म । अतः तस्य मित्राणि दुःखितानि आसन् । एकदा क्रीडन् स वनम् अगच्छत् । गुहायाः मुखं प्राप्य अपशब्दान् उच्चारितवान् । ततः च स तानेव शब्दान् श्रुतवान् । एतेन क्रुद्धः स गुहान्तः कश्चिद् अस्ति इति मत्वा गृहं प्रत्यागच्छत्, अग्रजं च सम्पूर्णं वृत्तान्तम् अकथयत् । तदनन्तरम् अग्रजं नीत्वा स तत्र अगच्छत्, गालीं दातुं च प्रारभत । एतद् दृष्ट्वा अग्रजः अनुजम् अवदत्, “वत्स ! त्वं यत् कथयसि गुहातः अपि तद् एव आगच्छति । एकवारं सद्वचनं कथय ।” रामः तथैव अकरोत् । तस्य वाक्यं प्रतिध्वनितम् अभवत् । तत् श्रुत्वा स प्रसन्नः अभवत् । तदनन्तरम् अग्रजः अकथयत्, “अन्यान् प्रति मानवः यादृशं व्यवहारं करोति, अन्ये अपि तं प्रति तादृशम् एव व्यवहारं कुर्वन्ति । अतः त्वं सर्वैः सह सम्यग् व्यवहारं कुरु ।” स तत्पश्चाद् मित्रैः सह प्रियं वक्तुम् आरब्धवान् ।

**प्रश्नाः**

(क) रामनारायणस्य गृहं कुत्र आसीत् ?

(ख) मित्राणि किमर्थं दुःखितानि आसन् ?

(ग) गुहायाः मुखं प्राप्य स किम् उच्चारितवान् ?

(घ) गुहातः किम् आगच्छति ?

(ङ) अग्रजः रामनारायणं किम् उपादिशत् ?

१२. कथां पठित्वा प्रश्नान् उत्तरयत

# त्यागी कः ?

एको धनिक आसीत् । स व्यापारेण उद्योगेन च अधिकं धनसञ्चयमकरोत् । धनिकस्य अभिलाषः केवलं धनसञ्चय आसीत् । धनाय धनिकस्य तृष्णा निरन्तरमवर्धत । किञ्चिदपि धनं दातुमुपभोक्तुञ्च स नैच्छत् । धनिकस्य एकं मित्रमासीत् । स धनिकस्य हितमभिलषति स्म । मित्रं धनिकस्य लुब्धस्वभावमपि जानाति स्म । मित्रं धनिकस्य हितं विचिन्त्य अवदत्, “त्वया सह अधिकं धनं वर्तते । धनं न केवलं सञ्चयस्य अपि तु दानस्य उपभोगस्य च विषयो वर्तते । दानमुपभोगञ्च विना धनं विनश्यति ।”

मित्रस्य कथनादपि धनिकस्य मनः परिवर्तितं नाभवत् । स धनाय एव इतस्ततः अधावत्, सततं कठोरं परिश्रमञ्च अकरोत् । स परिवाराय अपि स्वल्पमेव धनं व्ययीकरोति स्म । कदाचिद् धनिकः कार्यवशाद् अन्यद् नगरं गतः । तत्र एकः साधुस्तिष्ठति स्म । साधुः ख्यातनामा आसीत् । तस्य प्रचारः प्रतिष्ठा च आनगरं व्यापृते आस्ताम् । धनिकः अपि साधोर्विषये श्रुतवान् । स तं मिलितुमुत्सकः अभवत् ।

धनिकस्य साधुना सह मेलनम् अभवत् । धनिकः अब्रवीत्, “भवान् महान् त्यागी अस्ति इति मया नगरे श्रुतम् । त्यागिजनेन सह मेलनं पुण्यदायकं भवतीति सर्वत्र श्रूयते । भवतः दर्शनं मेलनञ्च मम प्रयोजनमस्ति ।”

धनिकस्य वचनं निशम्य साधुः अवदत्, “अहं दुःखस्य कारणस्वरूपस्य जगतः प्रपञ्चमेव अत्यजम् । तत् तुच्छं वस्तु वर्तते । तुच्छवस्तुनः त्यागात् कथं त्यागी वक्तुं शक्यते ? भवता तु जगतो विधाता शक्तिमान् परमेश्वर एव त्यक्तः । मम त्यागाद् भवतस्त्यागो विशिष्टो वर्तते । मम तुलनायां भवान् महान् त्यागी अस्ति ।” साधोर्वचनाद् धनिकस्य धनसञ्चयस्य मोहः अपगतः । स गृहं प्रत्यागत्य विद्यालयाय चिकित्सालयाय च अधिकं धनं अदात् । स लोकस्य हिताय च धनं प्रायच्छत् । धनिको दानवीरनाम्ना परिचितः अभवत् ।

**प्रश्नाः**

(क) धनिकस्य अभिलाषः कः ?

(ख) धनिकस्य मित्रं कीदृशम् आसीत् ?

(ग) धनं कथं विनश्यति ?

(घ) कस्य पार्श्वे प्रभूतं धनमासीत् ?

(ङ) त्यागिजनेन सह मेलनं कीदृशं भवति ?

(च) प्रपञ्चः कुत्र भवति ?

(छ) धनिकः किम् अत्यजत् ?

(ज) साधोर्वचनाद् धनिकः किमकरोत् ?

**१३. अधोलिखितं गद्यांशं पठित्वा शीर्षकचयनं कुरुत**

गौतमकुलोत्पन्नस्य सिद्धार्थस्य नाम सर्वे जानन्ति । सिद्धार्थः स्वजन्मना नेपालभूमिम् अलङ्कृतवान् । पुरा कपिलवस्तुजनपदे एकं सुन्दरं नगरमासीत् । शाक्यवंशोत्पन्नः शुद्धोदनस्तत्र राज्यं करोति स्म । तस्य मायादेवीनाम्नी सती भार्या आसीत् । तस्याः सिद्धार्थनामा सूनुर्जन्म लेभे । स शैशवादेव ज्ञानी विवेकी च आसीत् । तस्य हृदये शान्ति-दया-करुणादयः सद्भावा भरिता आसन् । स परदुःखं दृष्ट्वा पीडितोऽभवत् । सिद्धार्थो ज्ञानेन, तपसा धर्मोपदेशेन च मानवानां दुःखं दूरीकर्तुमैच्छत् । स प्रासादं त्यक्त्वा तपश्चर्यां समाचरत् । ततः स ज्ञानी अभवत् । जनास्तं "बुद्ध" इति वदन्ति ।

**१४. श्लोकौ पठित्वा प्रश्नान् उत्तरयत**

**पालकः मातृतुल्यो यः, पितृतुल्यश्च रक्षकः ।**
**भ्रातृतुल्यः सहायो यः, स मां रक्षतु माधवः ॥**
**कृपया यस्य सिध्यन्ति सत्कार्याणि सुखानि च ।**
**तं नमामि सदा देवं सज्ज्ञानस्य प्रदायकम् ॥**

**प्रश्नाः**

(क) कः पितृतुल्यः रक्षकः ?

(ख) माधवः केन तुल्यः सहायः ?

(ग) देवस्य कृपया किं सिध्यते ?

(घ) अहं कं नमामि ?

**१५. अनुच्छेदं पठित्वा प्रश्नोत्तराणि लिखत**

सर्वे जनाः स्वर्गसुखं सर्वोत्तमं मन्यन्ते । परं स्वर्गसुखं काल्पनिकं वर्तते । जन्मदात्री जननी अस्मभ्यं यानि सुखानि यच्छति, तानि स्वर्गादपि गुरुतराणि सन्ति । जननी इव जन्मभूमिः

अपि अस्माकं माता अस्ति । जन्मभूमिः नानाविधानि अन्नानि फलानि प्रदाय अस्मान् तोषयति । सा मृत्तिकाः, पाषाणान्, धातून्, खनिजपदार्थान् च दत्त्वा समृद्धान् करोति । अत एव उक्तम्

**जननी जन्मभूमिश्च स्वर्गादपि गरीयसी ।**

**प्रश्नाः**

(क) जनाः किं सर्वोत्तमं सुखं मन्यन्ते ?

(ख) किं काल्पनिकं वर्तते ?

(ग) का अस्मभ्यं सुखानि यच्छति ?

(घ) जन्मभूमिः अस्मभ्यं किं किं यच्छति ?

## व्यवहारानुशीलनम्

**१. मित्रैः सह कथं व्यवहरणीयम् इति कक्षायां विमृशत ।**

**२. आत्मना मित्रविषये श्रुतां कामपि नीतिकथां कक्षायां श्रावयित्वा तस्य सन्देशं वदत ।**

**३. समुचिते विकल्पे चिह्नं (√) दत्त**

(क) मित्रस्य त्रुटिं दृष्ट्वा किं करोषि ?

(अ) हसामि (आ) त्रुटिं शोधयितुं शिक्षयामि (इ) तूष्णीं तिष्ठामि

(ख) वर्षा जायमाना अस्ति, तव पार्श्वे छत्रम् अस्ति परन्तु मित्रस्य पार्श्वे छत्रम् नास्ति चेत् किं करोषि ?

(अ) मित्रं सहैव नयामि (आ) मित्रं विहाय गच्छामि (इ) छत्रं मित्राय दत्त्वा गच्छामि

(ग) मित्रस्य पार्श्वे स्वल्पाहारः नास्ति परन्तु तव पार्श्वे अस्ति चेत् किं करोषि ?

(अ) एकाकी खादामि (आ) मित्राय अपि ददामि (इ) दूरे स्थित्वा खादामि

(घ) त्वं मित्रस्य विलुप्तां लेखनीं प्राप्तवान् असि चेत् किं करोषि ?

(अ) मित्राय एव ददामि (आ) स्वस्य स्यूतके स्थापयामि (इ) अवकरभाण्डे क्षिपामि

## पाठः १२

नीतिपद्यम्

# स्वर्गभोगिनः

द्वाविमौ पुरुषौ राजन् स्वर्गस्योपरि तिष्ठतः ।
प्रभुश्च क्षमया युक्तो दरिद्रश्च प्रदानवान् ॥
यावत्कीर्तिर्मनुष्यस्य पुण्या लोके प्रगीयते ।
तावत् स पुरुषव्याघ्रः स्वर्गलोके महीयते ॥
मातृवत् स्वसृवच्चैव नित्यं दुहितृवच्च ये ।
परदारेषु वर्तन्ते ते नराः स्वर्गगामिनः ॥

**प्रथमः श्लोकः**

**पदच्छेदः**

द्वौ, इमौ, पुरुषौ, राजन्, स्वर्गस्य, उपरि, तिष्ठतः, प्रभुः, च, क्षमया, युक्तः, दरिद्रः, च, प्रदानवान् ।

**सरलार्थः**

हे राजन् ! संसारे यः शासकः सन् अपि क्षमाशीलः अस्ति, तथा च यः दरिद्रः सन् अपि दानशीलः अस्ति, एतौ द्वौ मनुष्यौ स्वर्गाद् अपि उपरि तिष्ठतः अर्थात् एतौ द्वौ स्वर्गादपि विशिष्टं फलं प्राप्नुतः ।

**द्वितीयः श्लोकः**

**पदच्छेदः**

यावत्, कीर्तिः, मनुष्यस्य, पुण्या, लोके, प्रगीयते, तावत्, सः, पुरुषव्याघ्रः, स्वर्गलोके, महीयते ।

***शिक्षणालोकः***

*सन्तापरहितं जीवनं यापयितुम्, परत्र च आनन्दम् अवाप्तुं प्रेरयिष्यमाणान् श्लोकान् अन्विष्य कक्षायां श्रावयितव्याः । एतादृशानां श्लोकानाम् अन्वेषणे, वाचने च छात्राः प्रेरयितव्याः ।*

**सरलार्थः**

अस्मिन् लोके यः पुण्यकर्माणि करोति, तस्य कीर्तिः प्रसारिता भवति । जनस्य कीर्तेः गानं यावत् कालपर्यन्तं भवति तावत् कालपर्यन्तं स व्याघ्र इव जनः स्वर्गलोके विराजते ।

### तृतीयः श्लोकः

**पदच्छेदः**

मातृवत्, स्वसृवत्, च, एव, नित्यम्, दुहितृवत्, च, ये, परदारेषु, वर्तन्ते, ते, नराः, स्वर्गगामिनः ।

**सरलार्थः**

ये मनुष्याः सदा परदारेषु मातृतुल्यम्, भगिनीतुल्यम्, पुत्रीतुल्यं च व्यवहारं कुर्वन्ति, ते निश्चयमेव स्वर्गं गच्छन्ति ।

## अभ्यासः

### पाठानुशीलनम्

**१. पाठस्थानां त्रयाणां श्लोकानां सस्वरपठनं, श्रुतिलेखनं च कुरुत ।**

**२. सङ्क्षेपेण उत्तरयत**

(क) कीदृशौ द्वौ पुरुषौ स्वर्गाद् अपि उपरि तिष्ठतः ?

(ख) कः स्वर्गलोके विराजते ?

(ग) कैः सह भगिनीवद् व्यवहारः कर्तव्यः ?

(घ) कीदृशाः नराः स्वर्गगामिनः सन्ति ?

**३. कोष्ठस्थपदानि प्रयुज्य रिक्तस्थानं पूरयत**

**कीर्तिः, स्वर्गम्, स्वसा, महीयते**

(क) क्षमया युक्तः पुरुषः ................. गच्छति ।

(ख) मनुष्यस्य .......... गीयते ।

(ग) पुरुषव्याघ्रः स्वर्गलोके ........... ।

(घ) परस्त्री .......... अस्ति ।

४. **श्लोकसमन्वयं कुरुत**

| | |
|---|---|
| प्रभुश्च क्षमया युक्तो | पुण्या लोके प्रगीयते |
| यावत्कीर्तिर्मनुष्यस्य | स्वर्गलोके महीयते |
| तावत् स पुरुषव्याघ्रः | मा प्रयच्छेश्वरे धनम् |
| मातृवत् स्वसृवच्चैव | नित्यं दुहितृवच्च ये |
| | दरिद्रश्च प्रदानवान् |

५. **समीचीनकथने 'आम्' असमीचीनकथने च 'न' इति लिखत**

(क) निर्धनः परन्तु दानी स्वर्गं गच्छति ।

(ख) क्षमया युक्तः स्वामी नरकं गच्छति ।

(ग) कीर्तिमान् मनुष्यः दुःखी भवति ।

(घ) परदारेषु मातृवद् व्यवहारः कर्तव्यः ।

(ङ) स्वर्गं गन्तुकामः चरित्रवान् भवेत् ।

६. **पदानि प्रयुज्य वाक्यानि रचयत**

**तिष्ठतः, क्षमया, लोके, नित्यम्, ये, वर्तन्ते, स्वर्गगामिनः ।**

७. **श्लोकं पठित्वा नेपालीभाषायाम् अनुवादं कुरुत**

**शीलेन हि त्रयो लोका जेतुं शक्या न संशयः ।**

**न हि किञ्चिदसाध्यं वै लोके शीलवतां भवेत् ॥**

८. **मनुष्याणां स्वभावविषये लिखितान् सद्गुणान् दुर्गुणान् च मञ्जूषायां लिखत**

**क्षमा, शोषणम्, दानम्, सहयोगः, ताडनम्, ज्ञानम्, अन्यायः, हत्या, सत्कारः, अपकारः, निन्दा, शीलम्, क्रोधः, मोहः, त्यागः, सरलता ।**

| सद्गुणाः | दुर्गुणाः |
|---|---|
| | |

९. **अधस्तनं श्लोकं पठित्वा प्रदत्तान् प्रश्नान् उत्तरयत**

**मूर्खस्तु परिहर्तव्यः प्रत्यक्षः द्विपदः पशुः ।**
**भिनत्ति वाक्यशल्येन निर्दृशां कण्टका यथा ॥**

**प्रश्नाः**

(क) कः परिहर्तव्यः ?

(ख) मूर्खः कीदृशः पशुः अस्ति ?

(ग) कण्टकाः केषां भेदनं कुर्वन्ति ?

(घ) मूर्खः केन जनानां हृदयं भिनत्ति ?

१०. **मञ्जूषायाः आधारेण चित्रं विलोक्य सङ्क्षेपेण वर्णयत**




अनाथालयः, पट्टम्, अवलम्बितम्, कार्यक्रमः, सञ्चालितः, दाता, रूप्यकाणि, करतलध्वनिः, दर्शकाः, अस्ति, वर्तते, ददाति ।

## ११. कथां पठित्वा प्रश्नान् उत्तरयत

पुरा हस्तिनापुरराज्ये पाण्डुनामकः राजा आसीत् । तस्य युधिष्ठिरः, भीमः, अर्जुनः, नकुलः, सहदेवश्च पञ्च पुत्राः अभवन् । पाण्डोः अग्रजः धृतराष्ट्र आसीत् । तस्य दुर्योधनः, दुशासनः इत्यादयः शतं पुत्राः आसन् । पाण्डुपुत्राः पाण्डवाः धृतराष्ट्रपुत्राः कौरवाः कथ्यन्ते स्म । राजप्रासादे एव तेषां शिक्षायाः व्यवस्था विहिता आसीत् । तेषां शास्त्रनिपुणः कृपाचार्यः, धनुर्विद्यानिपुणः द्रोणाचार्यश्च गुरू आस्ताम् ।



एकदा द्रोणाचार्यस्य धनुर्विद्यायां नैपुण्यं श्रुत्वा ततः विद्यां ग्रहीतुम् एकः बालक आगच्छत् । स गुरुम् अकथयत्, "भो गुरो ! अहम् अपि भवतः शिष्यत्वं वाञ्छामि । अतः मां शिष्यरूपेण स्वीकरोतु ।" तदीयं वचनम् आकर्ण्य द्रोणाचार्यः अवदत्, "हे बालक ! अयं तु राजप्रासादः अस्ति । अत्र राजकुमारा एव शिक्ष्यन्ते नान्ये ।" स बालकः वारं वारम् आग्रहम् अकरोत् । परन्तु गुरुणा अस्वीकृतः सन् ततः प्रत्यगच्छत् । गुरुश्च तं विस्मृतवान् । कतिचिद् वर्षाणि व्यतीतानि । तन्मध्ये द्रोणाचार्येण उद्घोषितम् आसीत्, "मम शिष्येषु अर्जुनसदृशः धनुर्विद्यायां कुशलः न कोऽपि आसीत्, नास्ति, न भविष्यति च ।"

कस्मिंश्चित् समये पाण्डवाः, कौरवाश्च गुरुणा द्रोणाचार्येण सह वनभोजार्थं गता आसन् । तत्र वने कौरवाः पाण्डवाश्च क्रीडने रताः भ्रमन्त आसन् । तदैव शरैः पूरितमुखः एकः कुक्कुरः तत्र आगच्छत् । शरैः पूरितम् अपि कुक्कुरस्य मुखं व्रणरहितम् आसीत् । तथाविधाम् आश्चर्यजनिकां घटनां दृष्ट्वा कौरवाः पाण्डवाश्च गुरुणा सह प्रहर्तारं अन्वेष्टुम् अगच्छन् । धनुर्धरम् अन्विषन्तः ते किञ्चिद्दूरे एकं युवकं दृष्टवन्तः, यः धनुर्विद्यायाः अभ्यासं कुर्वन् आसीत् । सर्वे तत्र प्राप्नुवन् । युवकश्च गुरुं द्रोणाचार्यं दृष्ट्वा अनमत् ।

गुरुः द्रोणाचार्यः अपृच्छत्, "त्वम् कः असि ? मां कथं परिचिनोषि ?" युवकः प्रत्यवदत्, "गुरो ! अहं भवत एव शिष्यः अस्मि । पूर्वं शिक्षाग्रहणार्थं राजप्रासादम् गतवान् आसम् । परन्तु भवत मुखाद् "मम कृते तत्र शिक्षाया व्यवस्था न भवति" इति श्रुत्वा प्रत्यावृत्य अत्र आगत्य भवतः मूर्तिं

संस्थाप्य अभ्यासं कुर्वन् अस्मि ।" तस्य कथनं श्रुत्वा मूर्तिं च दृष्ट्वा गुरुः द्रोणाचार्यः अवदत्, "त्वं महान् धनुर्धरः असि ।" तदनन्तरं द्रोणाचार्यः अर्जुनसदृशम् अपरं धनुर्धरं दृष्ट्वा स्वकथनं स्मरन् गुरुदक्षिणायै तस्य अङ्गुष्ठम् अयाचत । स च तत्रैव स्वस्य अङ्गुष्ठं कर्तित्वा गुरवे अदात् । स एव धनुर्विद्यानिष्णातः गुरुभक्तः एकलव्यः इति नाम्ना विख्यातो अभवत् ।

**(अ) एकपदेन प्रश्नान् उत्तरयत**

(क) हस्तिनापुरस्य राज्ञः नाम किम् आसीत् ?

(ख) कौरवाणां पाण्डवानां च धनुर्विद्यायाः गुरुः कः ?

(ग) कः द्रोणाचार्यस्य शिष्यत्वं वाञ्छति स्म ?

(घ) धनुर्विद्यायां सर्वश्रेष्ठः पाण्डवः क आसीत् ?

**(आ) पूर्णवाक्येन प्रश्नान् उत्तरयत**

(क) राजप्रासादे के एव शिक्ष्यन्ते स्म ?

(ख) कस्य मुखं शरैः पूरितम् आसीत् ?

(ग) एकलव्यः किमर्थं राजप्रासादं गतः ?

(घ) द्रोणाचार्यः गुरुदक्षिणायै किम् अयाचत ?

**१२. अधोलिखितसंवादं पठित्वा प्रश्नान् उत्तरयत**

लक्ष्मणः - (विलोक्य) अये ! अयम् आर्यः रामः । न, न, रूपसादृश्यम् । (सुमन्त्रं दृष्ट्वा) तातः ?

सुमन्त्रः - अये कुमारः लक्ष्मणः ?

भरतः - एवम्, गुरुः अयम् । आर्य ! अभिवादये ।

लक्ष्मणः - एहि एहि । आयुष्मान् भव (सुमन्त्रं वीक्ष्य) तात ! कः अत्रभवान् ?

सुमन्त्रः - कुमार ! अयं भरतः कुमारः ।

लक्ष्मणः - एहि एहि इक्ष्वाकुकुमार वत्स ! स्वस्ति, आयुष्मान् भव ।

भरतः - अनुगृहीतोऽस्मि ।

लक्ष्मणः - कुमार ! इह तिष्ठ । त्वदागमनम् आर्याय निवेदयामि ।

भरतः - आर्य ! अचिरम् इदानीम् अभिवादयितुम् इच्छामि । शीघ्रं निवेद्यताम् ।

लक्ष्मणः - बाढम् । (उपेत्य) जयतु आर्यः । आर्य !

अयं ते दयितो भ्राता भरतो भ्रातृवत्सलः ।
सङ्क्रान्तं यत्र ते रूपमादर्श इव तिष्ठति ॥

रामः - वत्स लक्ष्मण ! किमेवं भरतः प्राप्तः ?

लक्ष्मणः - अथ किम् ?

**प्रश्नाः**

(क) लक्ष्मणः कं दृष्ट्वा चिन्तयति यत् 'सः रामः अस्ति ।' ?

(ख) अस्मिन् नाट्यांशे कति पात्राणि वार्तालापं कुर्वन्ति ?

(ग) भरतः किं शीघ्रं कर्तुम् इच्छति ?

## व्यवहारानुशीलनम्

**१. वृद्धाश्रमं गत्वा तत्रत्यानां वृद्धानाम् उपदेशं सङ्कलय्य कक्षायां श्रावयत ।**

**२. त्वया सहयोगार्थं कृतस्य कस्यचन कार्यस्य कक्षायां वर्णनं कुरु ।**

**३. समुचिते विकल्पे चिह्नं (√) दत्त**

(क) तुभ्यं कः रोचते ?

(अ) दानी (आ) लोभी (इ) अलसः

(ख) त्वं किं भवितुम् इच्छसि ?

(अ) पीडकः (आ) सेवकः (इ) निन्दकः

(ग) त्वं कीदृशं वाक्यं वदसि ?

(अ) प्रियम् (आ) अप्रियम् (इ) कठोरम्

(घ) त्वं कीदृशं कार्यं करोषि ?

(अ) निन्दनीयम् (आ) प्रशंसनीयम् (इ) अहितकरम्

नीतिपद्यम्

# दुःखकारणानि

सन्तापाद् भ्रश्यते रूपं सन्तापाद् भ्रश्यते बलम् ।
सन्तापाद् भ्रश्यते ज्ञानं सन्तापाद् व्याधिमृच्छति ॥
लोभात् क्रोधः प्रभवति लोभात् कामः प्रजायते ।
लोभान्मोहश्च नाशश्च लोभः पापस्य कारणम् ॥
ईर्ष्यी घृणी त्वसन्तुष्टः क्रोधनो नित्यशङ्कितः ।
परभाग्योपजीवी च षडेते नित्यदुःखिताः ॥

**प्रथमः श्लोकः**

**पदच्छेदः**

सन्तापाद्, भ्रश्यते, रूपम्, सन्तापाद्, भ्रश्यते, बलम्, सन्तापाद्, भ्रश्यते, ज्ञानम्, सन्तापाद्, व्याधिम्, ऋच्छति ।

**सरलार्थः**

चिन्तया रूपं भ्रष्टं भवति, चिन्तया एव बलस्य क्षयः जायते, चिन्तया हि ज्ञाने ह्रासः आयाति अर्थात् चिन्तया ज्ञानस्य समुचितं प्रयोगं कर्तुं मनुष्यः अक्षमः भवति, चिन्तया मनुष्यः रुग्णश्च भवति ।

**द्वितीयः श्लोकः**

**पदच्छेदः**

लोभाद्, क्रोधः, प्रभवति, लोभाद्, कामः, प्रजायते, लोभाद्, मोहः, च, नाशः, च, लोभः, पापस्य, कारणम् ।

*शिक्षणालोकः*

*जनव्यवहारे दुःखानां यानि कानि अपि कारणानि भवन्ति, तेषां निराकरणाय अवलम्बनीयानाम् उपायानां विषये लिखितानां श्लोकानाम् अन्वेषणाय, तदर्थकरणाय च छात्राः प्रेरणीयाः ।*

**सरलार्थः**

लोभात् मनुष्ये क्रोधः उत्पन्नः भवति । लोभस्य कारणेन एव मनुष्ये कामवासना अपि उत्पद्यते । लोभस्य कारणेन एव मनुष्ये मोहः सञ्जायते । लोभस्य कारणेन एव जनस्य नाशः च भवति । अतः एव लोभः पापस्य प्रमुखं कारणम् अस्ति ।

### तृतीयः श्लोकः

**पदच्छेदः**

ईर्ष्यी, घृणी, तु, असन्तुष्टः, क्रोधनः, नित्यशङ्कितः, परभाग्योपजीवी, च, षट्, एते, नित्यदुःखिताः ।

**सरलार्थः**

ईर्ष्यायुक्तः, घृणायुक्तः, असन्तोषी, क्रोधी, सदा शङ्काशीलः, अन्येषां भाग्यस्य आधारे जीवितुम् इच्छुकः च एते षट्प्रकारकाः मनुष्याः सर्वदा दुःखिनः भवन्ति ।

## अभ्यासः

### पाठानुशीलनम्

१. **शुद्धमुच्चारयत**

**सन्तापात्, भ्रश्यते, व्याधिम्, प्रजायते, ईर्ष्यी, घृणी, परभाग्योपजीवी, नित्यदुःखिताः ।**

२. **पाठस्थान् श्लोकान् सस्वरं वाचयत ।**

३. **पाठस्थं द्वितीयं श्लोकं शिक्षकमुखात् श्रुत्वा लिखत ।**

४. **एकपदेन उत्तरयत**

(क) कस्माद् रूपं भ्रश्यते ?

(ख) सन्तापात् किम् ऋच्छति ?

(ग) पापस्य कारणम् किम् अस्ति ?

(घ) असन्तुष्टः कीदृशः भवति ?

५. **सङ्क्षेपेण उत्तरयत**

(क) सन्तापात् किं किं भवति ?

(ख) लोभः किमर्थं पापस्य कारणम् अस्ति ?

(ग) कीदृशाः मनुष्याः दुःखिनः भवन्ति ?

**६. उचितपदेन रिक्तस्थानं पूरयत**

**लोभात्, ज्ञानम्, षट्प्रकारकाः, प्रजायते, दुःखी**

(क) सन्तापाद् ............. भ्रश्यते ।

(ख) ............. मोहनाशौ भवतः ।

(ग) लोभात् कामः ............... ।

(घ) परभाग्योपजीवी ........... भवति ।

(ङ) .......... मनुष्याः दुःखिनः भवन्ति ।

**७. श्लोकांशान् परस्परं मेलयत**

| | |
|---|---|
| सन्तापाद् भ्रश्यते रूपम् | सन्तापाद् व्याधिमृच्छति |
| सन्तापाद् भ्रश्यते ज्ञानम् | पापं कुर्वन्ति यत्नतः |
| लोभात् क्रोधः प्रभवति | लोभः पापस्य कारणम् |
| लोभान्मोहश्च नाशश्च | सन्तापाद् भ्रश्यते बलम् |
| | लोभात् कामः प्रजायते |

**८. समीचीनकथने 'आम्', असमीचीनकथने च 'न' इति लिखत**

(क) लोभाद् बलं भ्रश्यते ।

(ख) लोभात् क्रोधः प्रभवति ।

(ग) परभाग्योपजीवी सुखी भवति ।

(घ) सन्तापः पापस्य कारणम् अस्ति ।

(ङ) घृणी दुःखी भवति ।

**९. अधस्तनकथांशं पठित्वा प्रश्नान् उत्तरयत**

धर्मः सत्यश्च मित्रे आस्ताम् । एकदा धर्मसत्ययोर्मध्ये बलस्य विषये विवादः अभवत् । धर्म आह, "अहं बलवान् अस्मि ।" सत्योऽवदत्, "न हि त्वम्, अहं बलवान् अस्मि ।" बलस्य निर्णयाय द्वे एव

मित्रे सर्पराजस्य समीपे अगच्छताम् । ते विवादस्य विषयं सर्पराजं न्यवेदयताम् । सर्पराजोऽब्रवीत्, "यः पृथ्वीं धारयेत् स एव बलवान् भवेत् ।" प्रतिज्ञां पूरयितुं स धर्माय पृथ्वीमदात् । धर्मः पृथ्वीं वोढुं नाशक्नोत् । स व्याकुलोऽभवत् । सर्पराजः पुनः सत्याय पृथ्वीमदात् । स कतिपययुगानि यावत् पृथ्वीमधारयत् । धर्मसत्ययोर्बलस्य विवादः समाप्तः । ते मित्रे एव अभवताम् ।

**प्रश्नाः**

(क) धर्मसत्ययोः किमर्थं विवादोऽभवत् ?

(ख) धर्मः किम् आह ?

(ग) सत्यः किम् अवदत् ?

(घ) मित्रे बलस्य निर्णयाय कुत्र अगच्छताम् ?

(ङ) सर्पराजः किम् अकथयत् ?

(च) कः पृथ्वीं वोढुं नाशक्नोत् ?

(छ) पृथ्वीं धर्तुं कः समर्थोऽभवत् ?

(ज) अस्य कथांशस्य सन्देशः कः ?

**१०. रिक्तस्थानं पूरयत**

ईर्ष्यी ........ त्वसन्तुष्टः .......... नित्यशङ्कितः ।
परभाग्योपजीवी च ........ नित्य................ ॥

**११. सरलार्थं लिखित्वा कक्षायां श्रावयत**

मातापित्रोर्गुरूणां च पूजा बहुमता मम ।
इह युक्तो नरो लोकान् यशश्च महदश्नुते ॥

**१२. श्लोकं पठित्वा 'कर्मणः आवश्यकता' इति विषये एकम् अनुच्छेदं लिखत**

कृती सर्वत्र लभते प्रतिष्ठां भाग्यसंयुताम् ।
अकृती लभते भ्रष्टः क्षते क्षारावसेचनम् ॥

**१३. अधस्तनं श्लोकं पठित्वा प्रदत्तान् प्रश्नान् उत्तरयत**

दुर्जनस्य च सर्पस्य वरं सर्पो न दुर्जनः ।
सर्पो दशति काले तु दुर्जनस्तु पदे पदे ॥

**प्रश्नाः**

(क) दुर्जनात् कः वरम् ?

(ख) सर्पः किं करोति ?

(ग) कः प्रतिपदं दशति ?

(घ) दुर्जनात् सर्पः किमर्थं वरम् ?

## १४. संवादं पठित्वा शीर्षकं वदत

पत्रकारः महाशय ! भवान् तत्परोऽस्ति ? किञ्चित् प्रष्टुमिच्छामि ।

दार्शनिकः तत्परोऽस्मि, यथेच्छं दश प्रश्नान् कुरु ।

पत्रकारः भवतो विचारे जगतः सर्वेषां प्राणिनां दुःखस्य कारणं किमस्ति ?

दार्शनिकः अज्ञानमेव निखिलस्य दुःखस्य कारणं वर्तते । ज्ञानं विना प्राणिनो दुःखिनो भवन्ति ।

पत्रकारः अज्ञानस्य निराकरणस्य उपायो नास्ति ?

दार्शनिकः कथं नास्ति ? अस्ति । प्राणिभिस्तत् कार्यं कर्तव्यं येन दुःखस्य कारणम् अज्ञानमेव नष्टं भवेत् ।

पत्रकारः मनसि कथम् अशान्तिः उत्पद्यते ? तदपि ज्ञातुमिच्छामि ।

दार्शनिकः प्राणिनो लोभाकृष्टा भवन्ति । लोभाद् मनः अशान्तं जायते । उद्विग्ने मनसि धैर्यमपि न जायते । लोभाद् मुक्तिप्राप्तिः सरला नास्ति ।

पत्रकारः मानवजीवनस्य कर्तव्यं किम् ?

दार्शनिकः लोकोपकारः एव । लोकोपकाराद् नास्ति अन्यद् गुरुतरं कर्तव्यम् । लोकोपकारं विना जीवनयापनं व्यर्थमेव । लोको लोकोपकारं न विदधाति चेत् को विदधाति ?

पत्रकारः कः ईश्वरं प्राप्नोति ?

दार्शनिकः यः सत्कर्म करोति सः ईश्वरं प्राप्नोति । ईश्वरप्राप्तेः द्वारं सत्कर्म वर्तते ।

## १५. मञ्जूषायाः आधारेण कथां पूरयत

### मञ्जूषा

**निवत्स्यथ, चत्वारः, श्रेष्ठी, त्रोटयितुम्, कलहम्, सङ्घे, अस्थापयत्, रज्ज्वा, पुत्रान्, सरलतया**

एकस्य श्रेष्ठिनः ................ पुत्राः आसन् । ते चत्वारोऽपि भ्रातरः परस्परं ................

कुर्वन्ति स्म । तेषां चतुर्णां भ्रातॄणां कलहं दृष्ट्वा सः ................ दुःखी आसीत् । एकदा स शुष्ककाष्ठानि एकत्रीकृत्य तानि ................ बद्ध्वा पुत्राणां समक्षम् अस्थापयत् । तान् पुत्रान् अवदत् च, "एतानि काष्ठानि त्रोटय ।" पुत्रेषु एकः अपि तानि ................ समर्थः नाभवत् । तदा स पृथक्कृत्य काष्ठानि पुत्राणां समक्षं पुनः ................ । सर्वे पुत्राः ................ सर्वाणि काष्ठानि अत्रोटयत् । सः ................ अकथयत्, "इत्थमेव यूयमपि चेत् परस्परं मिलित्वा ................तर्हि कोऽपि युष्मान् हन्तुं समर्थः न भविष्यति । यतो हि ................ शक्तिः कलौ युगे ।"

## व्यवहारानुशीलनम्

**१. कथं जीवनं सुखेन यापयितुं शक्यते ? अस्मिन् विषये मित्रैः सह विमर्शनं कुरुत ।**

**२. क्रोधेन समुत्पन्नायाः हानेः विषये स्वजीवने घटितां काञ्चन घटनां संस्मृत्य लिखत, शिक्षकं दर्शयत च ।**

**३. समुचिते विकल्पे चिह्नं (√) दत्त**

(क) माता मिष्टान्नानि वितरन्ती अस्ति चेत् त्वं किं करोषि ?

(अ) माता यावत् ददाति तावद् खादामि (आ) अधिकं याचे (इ) दुःखी भवामि

(ख) त्वं त्रैमासिकपरीक्षायां न्यूनं प्राप्ताङ्कं प्राप्तवान् असि चेत् किं करोषि ?

(अ) शोचामि (आ) अधिकं परिश्रमं करोमि (इ) शिक्षकं निन्दामि

(ग) कञ्चिद् व्रणितं पश्यसि चेत् किं करोषि ?

(अ) सहयोगं करोमि (आ) घृणां करोमि (इ) ततः पलायनं करोमि

(घ) स्वल्पाहारस्य वितरणे त्वम् अल्पम् एव प्राप्नोसि चेत् किं करोषि ?

(अ) कलहं करोमि (आ) सन्तोषं करोमि (इ) रोदनं करोमि

नीतिकथा

# विवेकेन विना विद्या अपूर्णा

एकस्मिन् नगरे एकः ब्राह्मणः निवसति स्म । तस्य चत्वारः पुत्राः आसन् । तेषु त्रयः शास्त्रपारङ्गताः परन्तु बुद्धिरहिताः आसन् । कनिष्ठस्तु शास्त्रज्ञानेन रहितः अपि बुद्धिमान् आसीत् । कदाचित् ते देशान्तरं गत्वा राजानं विद्यया सन्तोष्य धनार्जनं कर्तुम् ऐच्छन् । तदर्थं ते चत्वारः एव पूर्वदेशं प्रस्थितवन्तः । किञ्चिद् अग्रे गत्वा प्रथमः अकथयत्, "कनिष्ठः विद्याविहीनः अस्ति । अतः एष राजानं सन्तोषयितुं न शक्नोति । एष गृहं प्रत्यागच्छतु" इति । एवं श्रुत्वा द्वितीयः अपि प्रथमस्य एव समर्थनम् अकरोत् । परं तृतीयः अकथयत्, "न ! एषः अपि अस्माकम् अनुजः अस्ति, अतः एषः अस्माभिः सह एव गच्छतु" इति ।



*शिक्षणालोकः*

*बुद्धेः समुचितप्रयोगस्य आवश्यकताविषये छात्राः बोधनीयाः, एतादृशीः कथाः अन्विष्य श्रावणीयाः च ।*

तृतीयस्य वचनं श्रुत्वा तौ द्वौ अपि सहमतौ अभवताम् । ततः ते चत्वारः एव अग्रे अगच्छन् । गच्छन्तः ते वनं प्राप्तवन्तः । वने ते कानिचिद् अस्थीनि दृष्टवन्तः । अस्थीनि दृष्ट्वा प्रथमः अकथयत्, "अद्य मम विद्यायाः परीक्षणं भवति । अहम् एतस्य जन्तोः अस्थिसञ्चयं करोमि ।" एतत् कथयित्वा स स्वस्य विद्यायाः प्रयोगेण अस्थिसञ्चयं कृतवान् । तद् दृष्ट्वा द्वितीयः अकथयत्, "अहो ! अद्य मम अपि विद्यायाः परीक्षणं भवति । अहम् अस्मिन् अस्थिपञ्जरे चर्माणि, मांसानि, रक्तानि च संयोजयामि ।" एवम् उक्त्वा सः अपि स्वस्य विद्यायाः प्रयोगेण तस्मिन् अस्थिपञ्जरे चर्मणाम्, मांसानाम्, रक्तानां च संयोजनम् अकरोत् । एवं कृते सति तत्र एकः मृतः सिंहः उत्पन्नः अभवत् । एवं दृष्ट्वा तृतीयः अकथयत्, "अद्य मम विद्यायाः अपि परीक्षणं भवति । अहं मृते सिंहशरीरे प्राणसञ्चारं कारयामि ।" एवम् उक्त्वा यदा तृतीयः प्राणसञ्चारं कर्तुम् ऐच्छत्, तदा तं निषेधन् चतुर्थः अकथयत्, "भो ! तिष्ठतु, एष सिंहः अस्ति । प्राणसञ्चारानन्तरम् अस्मान् भक्षयिष्यति । अतः एवं न कर्तव्यम् ।" तस्य वचनं श्रुत्वा तृतीयः अकथयत्, "अरे मूर्ख ! एतौ द्वौ विद्यायाः परीक्षणे सफलौ अभवताम् । अहं कथं विफलो भवामि ? अतः अहम् अस्य शरीरे प्राणसञ्चारम् अवश्यं करिष्यामि । अत्र सन्देहः एव नास्ति ।" तस्य वचनं श्रुत्वा चतुर्थः शीघ्रं वृक्षम् आरोहत् । ततः तृतीयः स्वस्य विद्यायाः प्रयोगेण सिंहस्य शरीरे प्राणसञ्चारम् अकरोत् । प्राणसञ्चारानन्तरं सिंहः जीवितः सन् उदतिष्ठत् । स्वस्य अग्रे त्रीन् मनुष्यान् अवलोक्य स तान् त्रीन् एव मारयित्वा अखादत् । चतुर्थस्तु वृक्षाद् अवतीर्य गृहं प्रत्यागच्छत् । अतः कथ्यते -

**वरं बुद्धिर्न सा विद्या विद्याया बुद्धिरुत्तमा ।**
**बुद्धिहीना विनश्यन्ति यथा ते सिंहकारकाः ॥**

**श्लोकः**

**पदच्छेदः**

वरम्, बुद्धिः, न, सा, विद्या, विद्यायाः, बुद्धिः, उत्तमा, बुद्धिहीनाः, विनश्यन्ति, यथा, ते, सिंहकारकाः ।

**सरलार्थः**

विद्याध्ययनेन एव किमपि न भवति । विद्यायाः अपेक्षया बुद्धिः श्रेष्ठा वर्तते । यथा कथायां सिंहकारकाः विद्यावन्तः सन्तः अपि बुद्धेः अभावाद् विनष्टाः अभवन् । विद्याहीनः सन् अपि बुद्धियुक्तः कनिष्ठः जीवितः । अतः विद्यावान् मनुष्यः अपि बुद्धिहीनः अस्ति चेद् विनश्यति ।

## अभ्यासः

### पाठानुशीलनम्

१. पाठस्य द्रुतपठनं कुरुत ।

२. शुद्धमुच्चारयत

शास्त्रपारङ्गताः, कनिष्ठस्तु, अस्थिसञ्चयम्, प्राणसञ्चारानन्तरम्, उदतिष्ठत्, विनश्यन्ति ।

३. शिक्षकस्य साहाय्येन पाठस्य प्रथमानुच्छेदस्य श्रुतिलेखनं कुरुत ।

४. एकपदेन उत्तरयत

(क) ब्राह्मणस्य कति पुत्राः आसन् ?

(ख) ब्राह्मणपुत्राः कुत्र प्रस्थितवन्तः ?

(ग) वने ते किं दृष्टवन्तः ?

(घ) अस्थीनि कस्य आसन् ?

(ङ) तृतीयः पुत्रः सिंहे किं कर्तुम् ऐच्छत् ?

५. एकवाक्येन उत्तरयत

(क) ब्राह्मणपुत्रेषु कनिष्ठभिन्नाः त्रयः कीदृशाः आसन् ?

(ख) कनिष्ठः किमर्थं राजानं सन्तोषयितुं न शक्नोति ?

(ग) अस्थीनि दृष्ट्वा प्रथमः किम् अकरोत् ?

(घ) तृतीयस्य वचनं श्रुत्वा चतुर्थः किम् अकरोत् ?

(ङ) जीवितः सिंहः किम् अकरोत् ?

(च) बुद्धिविद्ययोः का उत्तमा ?

६. परस्परं मेलयत

| | |
|---|---|
| प्रथमः | प्राणसञ्चारकः |
| द्वितीयः | वृक्षारोहकः |
| तृतीयः | अस्थिसङ्कलकः |
| चतुर्थः | धावकः |
| | मांसरक्तादिसञ्चारकः |

७. **समीचीनकथने 'आम्', असमीचीनकथने च 'न' इति लिखत**

(क) चतुर्थः शास्त्रपारङ्गतः आसीत् ।

(ख) तृतीयः चतुर्थम् अपि नेतुम् इच्छति ।

(ग) प्रथमः सिंहशरीरे प्राणसञ्चारम् अकरोत् ।

(घ) चतुर्थः प्राणसञ्चारं न्यषेधत् ।

(ङ) जीवनं प्राप्य सिंहः ब्राह्मणपुत्रेभ्यः धन्यवादम् अयच्छत् ।

८. **शुद्धं कृत्वा लिखत**

**निवशति, बिहीनः, कथइत्वा, त्रितीयः, शरिरे, चतूर्थः ।**

९. **कोष्ठस्थपदानां प्रयोगेण रिक्तस्थानं पूरयत ।**

**बुद्धिमान्, देशान्तरम्, चतुर्थः, वृक्षम्, विद्यायाः**

(क) ब्राह्मणपुत्राः धनार्जनाय ............ गन्तुम् ऐच्छन् ।

(ख) कनिष्ठः ........... आसीत् ।

(ग) त्रयः ब्राह्मणपुत्राः ............. प्रयोगम् अकुर्वन् ।

(घ) चतुर्थः .................. आरोहत् ।

(ङ) ............. गृहं प्रत्यागच्छत् ।

१०. **कथां पठित्वा प्रश्नान् उत्तरयत**

पुरा कस्मिँश्चित् समये मथुरायामेकः नृशंसः राजा अभवत् । तस्य नाम कंसः आसीत् । कंसस्य एका भगिनी आसीत् । तस्या नाम देवकी आसीत् । देवक्याः विवाहः वसुदेवेन सह अभवत् । विवाहानन्तरं प्रस्थानमार्गे आकाशवाणी अभवत्, "देवक्याः अष्टमः पुत्रः कंसं मारयति" इति । अतः कंसः वसुदेवं देवकीं च कारागारे अस्थापयत् । कंसः देवकी-वसुदेवयोः सप्त नवजातान् शिशून् अमारयत् । यदा श्रीकृष्णस्य जन्म अभवत् तदा कृष्णस्यैव इच्छया वसुदेवः तं गोकुले अनयत् । श्रीकृष्णस्य जन्म भाद्रमासस्य कृष्णपक्षे अष्टम्यां तिथौ अभवत् । अत एव वयं प्रतिवर्षम् अस्मिन् दिवसे तस्य जन्मोत्सवं मानयामः । श्रीकृष्णः दुराचारिणं कंसमहन् ।

**प्रश्नाः**

**(अ) एकपदेन उत्तराणि लिखत**

(क) कंसः कान् अमारयत् ?

(ख) कः श्रीकृष्णं गोकुले अनयत् ?

**(आ) पूर्णवाक्येन उत्तराणि लिखत**

(क) पुरा मथुरायाः राजा कः आसीत् ?

(ख) श्रीकृष्णस्य मातुः नाम किम् ?

(ग) कदा प्रस्थानमार्गे आकाशवाणी अभवत् ?

(घ) कस्य इच्छया श्रीकृष्णः गोकुले प्रापितः ?

**(इ) अस्या कथायाः शीर्षकं लिखत ।**

**११. अधस्तनानि पदानि प्रयुज्य वाक्यानि रचयत**

**पुत्राः, श्रुत्वा, विद्यायाः, प्रत्यागच्छत्, उत्तमा ।**

**१२. अधस्तनं गद्यांशं पठित्वा प्रदत्तान् प्रश्नान् उत्तरयत**



कस्मिँश्चिद् देशे एकः नृपः आसीत् । नृपः बुद्धिमान् आसीत् । अतः स मन्त्रिणां नियुक्तये अपि बुद्धिपरीक्षां करोति स्म । एतेन तस्य मन्त्रिणः अपि बुद्धिमन्तः आसन् । तस्य मन्त्रिमण्डले एकं मन्त्रिपदं रिक्तम् आसीत् । तस्मिन् पदे मन्त्रिणः नियुक्तये स बुद्धिपरीक्षाम् आयोजितवान् । बुद्धिपरीक्षायां राज्यस्य अनेके पण्डिताः आगताः आसन् । स सर्वान् एकां यष्टिम् अदर्शयत् । अनन्तरं स यष्टेः मूलभागम् अग्रभागं च निश्चेतुं निर्दिष्टवान् । सर्वे पण्डिताः किङ्कर्तव्यविमूढाः अभवन् । तेषु एकः पण्डितः नृपम् अकथयत्, “भो नृप ! यष्टिं

जले स्थापयतु, यष्टेः यः भागः जले निमज्जति स मूलभागः अस्ति, यश्च भागः न निमज्जति सः अग्रभागः अस्ति ।" पण्डितस्य वचनं श्रुत्वा नृपः सन्तुष्टः अभवत् । तमेव पण्डितं नृपः मन्त्रिपदे नियुक्तवान् ।

**प्रश्नाः**

(क) मन्त्रिणां नियुक्तये नृपः किं करोति स्म ?

(ख) बुद्धिपरीक्षायां के आगताः आसन् ?

(ग) नृपः पण्डितान् किम् अदर्शयत् ?

(घ) नृपः पण्डितान् किं निश्चेतुं निर्दिष्टवान् ?

(ङ) एकः पण्डितः नृपं किम् अकथयत् ?

## १३. गद्यभागं पठित्वा उपयुक्तं शीर्षकं दत्त

राज्ञो दशरथस्य चत्वारः पुत्राः आसन् । तेषु रामः ज्येष्ठः पुत्रः आसीत् । दशरथः रामस्य यौवराज्यसमारोहम् आयोजयितुं सेवकान् आदिशत् । समारोहो विशेषेण सज्जीकृतः । तदैव कैकेयी राज्ञो दशरथाद् वरद्वयम् अयाचत - रामस्य वनगमनं भरतस्य राज्याभिषेकश्च । पितुराज्ञया रामः वनमगच्छत् । भरतो रामं प्रत्यावर्तयितुं वनमगच्छत् । रामोऽवदत्, "अहं पितुः सत्यप्रतिज्ञां पालयामि एव ।" भरतः रामस्य पादुकामानीय प्रत्यावृत्तः । तामेव प्रपूज्य स राज्यं सञ्चालयामास । वनवासं समाप्य रामः अयोध्यां प्रत्यागच्छत् । भरतः राज्यशासनं समर्प्य हर्षितोऽभवत् । एतादृशी दशरथपुत्राणां भ्रातृभक्तिः आसीत् ।

## १४. कथां पठित्वा प्रश्नान् उत्तरयत



एकः टोपिकाविक्रेता अनेकवर्णाः टोपिकाः विक्रीणाति स्म । एकस्मिन् दिने श्रान्तः स एकस्य वृक्षस्य शीतलच्छायायाम् उपाविशत् । शनैः शनैः निद्रा तं स्ववशे अकरोत् । सः पुटकं शिरस्तले निधाय अस्वपत् । वृक्षे स्थिताः वानराः विविधवर्णयुक्ताः

टोपिकाः पुटके दृष्ट्वा अधः अवातरन् । शनैः शनैः ते पुटकात् टोपिकाः निष्कास्य शिरसि धारयित्वा वृक्षम् आरोहन् । प्रबुद्धः टोपिकाविक्रेता यदा उपरि पश्यति तदा रक्तनीलवर्णाः टोपिकाः धारयतः वानरान् पश्यति । "हा दैव ! नष्टाः मे सर्वाः टोपिकाः ।" इति विलपन् सः आत्मनः शिरसि धारितां टोपिकाम् अपि वेगेन भूमौ क्षिपति कथयति च, "रे दुष्टाः ! सर्वाः टोपिकाः तु गृहीताः । एताम् अपि नयत ।" प्रकृत्या अनुकरणशीलाः वानराः अपि स्वस्वटोपिकाः भूमौ प्रक्षिप्तवन्तः । आश्चर्यचकितः सः सर्वाः टोपिकाः विचित्य स्वपुटके स्थापयित्वा च प्रसन्नः सन् गृहं प्रति अचलत् ।

**प्रश्नाः**

(क) टोपिकाविक्रेता काः विक्रीणाति स्म ?

(ख) प्रकृत्या वानराः कीदृशाः भवन्ति ?

(ग) प्रबुद्धः टोपिकाविक्रेता वृक्षे किम् अपश्यत् ?

## व्यवहारानुशीलनम्

१. 'विद्यायाः बुद्धिरुत्तमा' इति विषयस्य पक्षे विपक्षे वा यथेच्छं स्वाभिमतं प्रकटयत ।

२. त्वं गृहे एकाकी वर्तसे । तदा एव कश्चिद् अपरिचितः जनः आगच्छति । स आत्मानं तव पितुः मित्रं कथयति । त्वां सह एव नेतुं च इच्छति । तस्याम् अवस्थायां त्वं किं करोषि ?

३. त्वं ग्रामाद् नगरं गतवान् असि । प्रत्यावर्तनार्थं यानारोहणसमये मार्गे पतित्वा तव पुरः एव कश्चिद् व्रणितः जातः । तस्याम् अवस्थायां त्वं किं करोषि ?

४. त्वं विद्यालयगमने विलम्बितः असि । अतः त्वं शीघ्रं चलन् असि । मार्गे कश्चन दृष्टिविहीनः मार्गस्य पारं गन्तुकामः अस्ति । तस्याम् अवस्थायां त्वं किं करोषि ?

५. तव पार्श्वे दश रूप्यकाणि वर्तन्ते । बसयानेन गृहं गन्तुं दश रूप्यकाणि आवश्यकानि भवन्ति । तदा एव कश्चिद् बुभुक्षितः त्वया सह भोजनार्थं रूप्यकाणि याचति । तस्याम् अवस्थायां त्वं किं करोषि ?

# पाठः १५

संवादः

## मित्रस्य सहयोगः

(एकदा समीहनः कार्यालयात् कार्यं समाप्य गृहं प्रत्यागच्छन् आसीत् । मार्गे सः स्वमित्रं मदनम् अपश्यत् । मदनश्च मलिनवदनः मार्गे मन्दगत्या चलन् आसीत् । तयोः मेलनम् अभूत् ।)

समीहनः : मदन ! कुतः आगच्छन् असि ? किमस्ति भो ! कुशली एव ?

मदनः : आम् अस्मि । परन्तु दुःखस्य विषयः वर्तते यद् द्यूतेन अहं पूर्णतया दरिद्रः अभवम् ।

समीहनः : किं कथयसि भो, किम् अभवत् ?

मदनः : द्यूते अहं पराजितः अभवम् । मम सर्वस्वं तत्रैव गतम् । किं करवाणि मित्र ! गृहम् अपि गन्तुम् असमर्थः अस्मि अधुना ।



*शिक्षणालोकः*

*पौरस्त्यैः विद्वद्भिः लिखितानां नाटकानां चर्चा कर्तव्या । संवादमञ्चनाय छात्राः नियोजयितव्याः, रचनायै च ते प्रेरणीयाः ।*

समीहनः : अहं तु पूर्वमेव उक्तवान् आसम् । द्यूतमोहः त्वां विनाशयति परन्तु त्वया अस्मिन् विषये तदा किमपि न चिन्तितम् ।

मदनः : त्वया सत्यं कथितम् आसीत् । अलसतया परिश्रमः मया न कृतः । इतः प्राक् तु बहूनि धनानि मया अर्जितानि । अधुना एतादृशी अवस्था च आगता ।

समीहनः : समाजे च अनेकाः विकृतयः प्रविष्टाः सन्ति । जनाः पर्वसु द्यूतं क्रीडन्ति । एतेन हानिः एव भवति, न हि विकासः । त्वं तु जानासि एव, यत् -

**काव्यशास्त्रविनोदेन कालो गच्छति धीमताम् ।**

**व्यसनेन च मूर्खाणां निद्रया कलहेन वा ॥**

अतः इदं स्मृत्वा कार्यं कर्तव्यम् ।

मदनः : सत्यं मित्र ! अधुना च उपायः कः अस्ति ? अहं त्वत्तः परामर्शं वाञ्छामि ।

समीहनः : साम्प्रतम् अपि त्वं बहु कर्तुं शक्नोषि । हृष्टपुष्टः असि, बलवान् असि । तव शरीरस्य सुगठनाय च श्रमः आवश्यकः वर्तते ।

मदनः : मया श्रमः कर्तव्यः, क्रियते च । पूर्वं तु समाजे चेतनाभिवृद्धये कार्यं कर्तव्यम् । अतः मम एव कथां श्रावयित्वा द्यूतादित्यागाय सर्वान् अनुरुणध्मि ।

समीहनः : अधुना एतादृशेन कार्येण सर्वेषां हितमेव भवति । अनन्तरं कञ्चन व्यवसायम् अवलम्ब्य कार्यं कुरु ।

मदनः : व्यवसायार्थं धनं नास्ति भो ।

समीहनः : त्वं यदि परिश्रमं करोषि, तर्हि अहं ददामि धनम् । चिन्तां मा कुरु । गोपनीयं किमपि नास्ति अत्र । गृहं गच्छ, सर्वं वृत्तान्तं श्रावय । तव योजनां च कथय । एतेन ते तुष्यन्ति एव ।

मदनः : सम्यग् उक्तं त्वया । इतः परम् अहं द्यूतक्रीडार्थं कदापि न गच्छामि इति मम दृढसङ्कल्पश्च वर्तते । अहं समयं परिश्रमेण यापयिष्ये ।

समीहनः : सहयोगार्थम् अहं सदैव तत्परः अस्मि । अधुना विलम्बः जायमानः अस्ति । गच्छाव ।

मदनः : द्यूतरतस्य तु कः अपि सखा न भवति, परं त्वत्सदृशं मित्रं मम अस्ति इति प्रसन्नमनाः अस्मि । गच्छाव अधुना ।

(द्वौ एव गृहं गतवन्तौ ।)

**श्लोकः**

**पदच्छेदः**

काव्यशास्त्रविनोदेन, कालः, गच्छति, धीमताम्, व्यसनेन, च, मूर्खाणाम्, निद्रया, कलहेन, वा ।

**सरलार्थः**

बुद्धिमतां विदुषां समयः काव्यशास्त्रादीनां चर्चया व्यतीतः भवति । परन्तु मूर्खाः द्यूतादिक्रीडनैः मनः रञ्जयित्वा, शयित्वा, कलहं कृत्वा वा कालं नयन्ति ।

## अभ्यासः

### पाठानुशीलनम्

१. **शुद्धमुच्चारयत**

**स्वमित्रम्, पूर्णतया, सर्वस्वम्, द्यूतमोहः, अर्जितानि, त्वत्तः, चेतनाभिवृद्धये, अवलम्ब्य, दृढसङ्कल्पः ।**

२. **पाठस्य मञ्चनं कुरुत ।**

३. **पाठस्थश्लोकस्य श्रुतिलेखनं कुरुत**

४. **एकपदेन उत्तरयत**

(क) मदनस्य सखा कः आसीत् ?

(ख) मदनः द्यूतेन कीदृशः अभवत् ?

(ग) मदनः कुत्र गन्तुम् असमर्थः अभवत् ?

(घ) केन बुद्धिमतां कालः गच्छति ?

(ङ) व्यवसायार्थं मदनस्य पार्श्वे किं नास्ति ?

(च) सहयोगार्थं कः तत्परः अस्ति ?

५. **सङ्क्षेपेण उत्तरयत**

(क) मदनः कथं दरिद्रः अभवत् ?

(ख) मूर्खस्य धीमतः च समयः कथं गच्छति ?

(ग) मदनः सर्वप्रथमं किं करोति ?

(घ) समीहनः मदनाय कीदृशं परामर्शम् अयच्छत् ?

(ङ) मदनेन कः सङ्कल्पः कृतः ?

६. **परस्परं मेलयत**

| | |
|---|---|
| मदनः | कार्यरतः |
| समीहनः | व्यसनी |
| बुद्धिमान् | द्यूतरतः |
| मूर्खः | परिश्रमी |

७. **रिक्तस्थानं पूरयत**

**सत्यम्, परामर्शम्, पराजितः, अस्ति, समयः**

(क) मदनः ............. अभवत् ।

(ख) समीहनः ............. कथयति ।

(ग) मदनः ............. वाञ्छति ।

(घ) .......... श्रमार्थ योजनीयः ।

(ङ) विलम्बः जायमानः .......... ।

८. **शुद्धं कुरुत**

**मलीनवदनः, धूतेन, करवानि, स्म्रित्वा, स्रमः, बेवसायार्थम्, करोसि ।**

९. **कथांशं पठित्वा प्रश्नान् उत्तरयत**



मुखे रोटिकाखण्डं गृहीत्वा एकः काकः वृक्षे उपविष्टः आसीत् । एकः शृगालः तम् दृष्ट्वा अवदत्, “भो मित्र ! खगेषु भवान् एव सुन्दरः, चतुरः, मधुर-गायकः च । कृपया गायतु” इति । रोटिकाखण्डं पादयोः अधः स्थापयित्वा काकः अवदत्, “रे नाहं पूर्ववत् मूर्खः । गताः ते दिवसाः । तर्हि गच्छतु” इति । लज्जितः शृगालः शिरः नत्वा ततः पलायितः ।

**प्रश्नाः**

(क) शृगालः कं प्रशंसति स्म ?

(ख) काकस्य उत्तरं श्रुत्वा कः लज्जितः अभवत् ?

(ग) काकस्य मुखे किमासीत् ?

(घ) काकः कुत्र उपविष्टः आसीत् ?

(ङ) काकः रोटिकाखण्डं कुत्र अस्थापयत् ?

**१०. उचितं पदं चित्वा रिक्तस्थानं पूरयत**

**आगच्छतु, मातुलः, आगतः, माननीयः, समयः, सम्यक्, व्यवहारम्**

सन्दीप : अग्रज, गृहे ........ आगतः अस्ति ।

दीपक : .......... अस्ति चेत् किं करवाणि ?

सन्दीप : मातुलः भवता सह मेलितुम् इच्छति । ......... भवान् ।

दीपक : किमर्थम् आगच्छानि क्रीडन् अस्मि, ........... नास्तीति कथय ।

सन्दीप : स मातुलः अस्ति । मातुलः ........... भवति । एतादृशम् एव ............ यदि अहं भवन्तं प्रति करोमि तर्हि किं भवति ? अतः आगच्छतु भवान् ।

दीपक : .............. उक्तं त्वया, गच्छाव ।

**११. अनुच्छेदौ पठित्वा भतृहरेः विषये सखिभिः सह चर्चा कुरुत**

भर्तृहरेः प्रामाणिकं जीवनचरितं न लभ्यते । जनश्रुत्या अन्यैः विवरणैश्च तस्य जीवनचरितम् ईषत् प्रकाशितं भवति । भर्तृहरेः पिता वीरसेनः माता च सुशीला आस्ताम् । सुशीला जम्बुद्वीपस्य राज्ञः एकाकी पुत्री आसीत् । अतः तद्देशीयः राजा स्वराज्यं जामात्रे भर्तृहरये अदात् । भर्तृहरिः स्वराज्यस्य राजधानीम् उज्जयिनीं चकार । भर्तृहरिः विक्रमादित्यस्य अग्रजः आसीत् । राजा विक्रमादित्यः विक्रमसंवत्सरस्य प्रवर्तकः आसीत् । संवत्सरोऽयं खिष्टाब्दात् सप्तपञ्चाशता वर्षैः पूर्वकालतः सञ्चलन्नस्ति । एतावता भर्तृहरेः कालः खिस्टाब्दात् पूर्वं प्रथमशताब्दी निर्धार्यते । विक्रमादित्यस्य नवसु सभारत्नेषु कालिदासोऽपि अन्यतमः मन्यते । अनेन भर्तृहरिः कालिदासश्च समकालिकौ आस्तामित्यत्र शङ्का नोद्भवति । जनश्रुतिः कथयति, "भर्तृहरिः असाधारणसुन्दर्याः पिङ्गलानाम्न्याः स्वकीयपत्न्याः विश्वासघातस्य कारणेन राजसिंहासनं तत्याज । ततः वैराग्यमानसः स तपश्चर्यां समाचरत् ।"

शतकत्रयस्य रचयिता भर्तृहरिः वाक्यपदीयस्य प्रणेता भर्तृहरिश्च एकः एव भिन्नः वा इत्यस्मिन् विषये विदुषां विवादः वर्तते । प्रायः अनुसन्धातारः एकमेव मन्वते । भर्तृहरिः सप्त ग्रन्थान् प्रणीतवान् । तेषु प्रसिद्धं मौलिकं रचनाद्वयं वर्तते - वाक्यपदीयम्, शतकत्रयं च । वाक्यपदीयं व्याकरणस्य ग्रन्थः अस्ति । अत्र काण्डत्रयं वर्तते । प्रथमतः अस्मिन्नेव ग्रन्थे स्फोटसिद्धान्तस्य सर्वाङ्गपूर्णं विवेचनं विहितमस्ति । येन अर्थबोधः भवति तत् शब्दस्य स्फोटरूपं कथ्यते । शतकत्रयं मुक्तककाव्यं वर्तते । रसनिष्पत्यै यत्र पूर्वापरप्रसङ्गस्य आवश्यकता न भवति तत् मुक्तकम् उच्यते । मुक्तके पद्यं परस्परं मुक्तं भवति । शतकत्रये इमानि आयान्ति - शृङ्गारशतकम्, नीतिशतकम्, वैराग्यशतकम् च । प्रतिशतकं शतं पद्यानि सन्ति । शृङ्गारशतके शृङ्गारवृत्तेः शोभनं वर्णनमस्ति । नीतिशतके नैतिकसिद्धान्ताः प्रतिपादिताः सन्ति । जनमनः नीतौ नेतुं नीतिशतकम् अतुल्यं मार्गदर्शनं करोति । वैराग्यशतके संसारस्य विनश्वरता दर्शिता अस्ति । धाराप्रवाहिण्यां भाषायां लिखितं वैराग्यशतकं हृदये सौदामिनीतुल्यं भावगुम्फनं भरति । शतकमेतत् सांसारिकप्रपञ्चात् चेतः उत्थापयति । शतकत्रयस्य नामानि भिन्नानि सन्ति तदपि समेषां सारमस्ति - यः नीतिपथम् अनुसरति, स दुःखं नाप्नोति ।

**१२. मञ्जूषायाः आधारेण कथां पूरयत**

## मञ्जूषा

**उचितम्, वाशिङ्गटनमहाभागः, परशुना, तीक्ष्णताम्, अमेरिकादेशस्य, दिने, वीक्ष्य, निपातितः, सत्यभाषणेन, प्रकटितवन्तः**

एकदा एकः कृषकः पुत्राय एकं परशुं दत्तवान् । बालः परशुं गृहीत्वा क्षेत्रं प्रति अगच्छत् । तत्र स रोपितान् सर्वान् वृक्षान् ................ छिन्नवान् । एकः फलवृक्षः अपि तेन ................ , अपरस्मिन् ................ तस्य पिता क्षेत्रम् अगच्छत् । तत्र स छिन्नान् वृक्षान् ................ क्षेत्ररक्षकान् अपृच्छत् । ते तद्विषये स्व-अनभिज्ञतां ................ । तदा पुत्रः आगत्य पितरम् अवदत्, "महोदय ! परशोः ................ परीक्षितुं मया एते पादपाः निपातिताः ।" पिता अवदत्, "त्वया ................ न कृतम् । परम् अहं तव ................प्रीतः अस्मि । पुनः एवं न कार्यम् ।" स सत्यवादी बालकः वयस्कः भूत्वा ................ राष्ट्रपतिपदम् अलङ्कृतवान् । स ................ आसीत् ।

**१३. अधस्तनश्लोकानां गतियतिसंयोजनेन लयोच्चारणं कृत्वा अर्थं च वदत**

चन्दनं शीतलं लोके चन्दनादपि चन्द्रमाः ।
चन्द्रचन्दनयोर्मध्ये शीतला साधुसङ्गतिः ॥

प्रदोषे दीपकश्चन्द्रः प्रभाते दीपको रविः ।
त्रैलोक्ये दीपको धर्मः सुपुत्रः कुलदीपकः ॥

हंसः श्वेतो बकः श्वेतः को भेदो बकहंसयोः ।
नीरक्षीरविवेके तु हंसो हंसः, बको बकः ॥

## व्यवहारानुशीलनम्

**१. समूहद्वये विभज्य 'संस्कारः' इति विषये संवादं प्रदर्शयत ।**

**२. कुत्रचिद् युष्माभिः सहयोगः कृतः चेत् तस्मिन् विषये यथार्थपरकं संवादं रचयित्वा शिक्षकं प्रदर्शयत ।**

**३. समुचिते विकल्पे चिह्नं (√) दत्त**

(क) याने अस्वस्थः मनुष्यः उत्थितः अस्ति चेत् त्वं किं करोषि ?

(अ) स्वस्थाने उपवेशयामि ।  (आ) पश्यामि ।  (इ) तेन सह संलपामि ।

(ख) बलिष्ठः निर्बलं ताडयन् अस्ति । त्वं तत् पश्यसि चेत् किं करोषि ?

(अ) ततः पलाये ।  (आ) प्रहरिणं सूचयामि ।  (इ) बलिष्ठं ताडयामि ।

(ग) कार्यालये मनुष्याः पङ्क्तिबद्धाः सन्ति । तेषु एकः वृद्धः सर्वेषाम् पृष्ठतः अस्ति । त्वम् अपि तत्रैव असि चेत् किं करोषि ?

(अ) वृद्धम् अग्रे नयामि ।  (आ) स्वकार्यं समाप्य आगच्छामि ।

(इ) वृद्धं प्रति न पश्यामि ।

(घ) मार्गे दुर्घटनया मूर्च्छितं मनुष्यं पश्यसि चेत् किं करोषि ?

(अ) किमपि न करोमि ।  (आ) चिकित्सालयं प्रापयामि ।

(इ) दुःखं प्रकटयामि ।

नीतिकथा

# यस्य नास्ति स्वयं प्रज्ञा

एकस्मिन् नगरे एकः कौलिकः प्रतिवसति स्म । तस्य नाम मन्थरकः आसीत् । स वस्त्राणि निर्माय स्वस्य जीवनवृत्तिं करोति स्म । एकदा तस्य वस्त्रनिर्माणाय आवश्यकानि सर्वाणि उपकरणानि भग्नानि अभवन् । अतः चिन्तितः स पुनः उपकरणानि निर्मातुं काष्ठम् आनेतुम् एकं कुठारं गृहीत्वा वनम् अगच्छत् । वने एकं विशालं शिंशपावृक्षं दृष्ट्वा कर्तितुम् ऐच्छत् ।



तस्मिन् वृक्षे एकः यक्षः प्रतिवसति स्म । यदा कौलिकः तं वृक्षं प्रहर्तुम् आरभत, तदा यक्षः तं निषेधन् अकथयत्, "भो ! अयं वृक्षः मम वासः अस्ति, अतः इमं न कृन्त ।" यक्षस्य वचनं श्रुत्वा

*शिक्षणालोकः*

*सन्मित्राणां विषये लिखिताः कथाः सङ्कलय्य कक्षायां श्रावणीयाः, विद्यार्थिनश्च सङ्कलनार्थं प्रेरणीयाः ।*

कौलिकः अकथयत्, “मम वस्त्रनिर्माणाय आवश्यकानि सर्वाणि उपकरणानि नष्टानि अभवन् । अहं वस्त्रं न निर्मामि चेद् मम बालकाः बुभुक्षया म्रियन्ते । अतः अहम् इमं वृक्षं कर्तित्वा उपकरणानि निर्मामि ।”

कौलिकस्य वचनं श्रुत्वा यक्षः पुनः अकथयत्, “यदि त्वम् इमं वृक्षं न कृन्तसि, तर्हि यद् याचसि तद् ददामि ।” एवं श्रुत्वा कौलिकः “अहं भार्यां मित्रं च पृष्ट्वा आगत्य याचामि” इति उक्त्वा ततः अगच्छत् । मार्गे स स्वमित्रं नापितम् अपश्यत् । तं दृष्ट्वा स सर्वं वृत्तान्तं श्रावयित्वा मित्रस्य परामर्शम् ऐच्छत् । कौलिकस्य कथनं श्रुत्वा नापितः अकथयत्, “भो मित्र ! यक्षः अवश्यं ददाति चेत् त्वं राज्यं याच । राज्ये प्राप्ते त्वं राजा भविष्यसि, अहं तव मन्त्री भविष्यामि । यज्ञादिकं दानधर्मादिकं च कृत्वा आवाम् इहलोके परलोके च सुखम् अनुभविष्यावः ।” तस्य वचनं श्रुत्वा कौलिकः सन्तुष्टस्तु जातः परं भार्यामपि एतद्विषये प्रष्टुम् ऐच्छत् । स गृहं गत्वा भार्याम् अपि सर्वं वृत्तान्तम्, नापितस्य कथनं च श्रावयित्वा “किं याचानि ?” इति अपृच्छत् ।

तस्य भार्या नापितस्य वचनम् अवहेल्य अकथयत्, “भो ! एवं मा कुरु । राज्ये विविधाः चिन्ताः आपतिष्यन्ति । अतः राज्यं न याच । त्वं कौलिकः असि, यदि तव द्वे शिरसी, चत्वारः हस्ताः च भविष्यन्ति, तर्हि त्वं द्विगुणपरिमितानि वस्त्राणि निर्मातुं शक्नोषि । अतः अपरौ द्वौ हस्तौ अपरं च एकं शिरः याच” इति ।

भार्यायाः वचनेन सन्तुष्टः कौलिकः शीघ्रं यक्षस्य समीपं गतवान् । स मित्रस्य वचनम् अवहेल्य भार्यायाः वचनानुसारम् अपरौ द्वौ हस्तौ, अपरम् एकं शिरः च अयाचत । यक्षस्य ‘तथास्तु’ इति प्रतिवचनानन्तरम् एव कौलिकस्य द्वे शिरसी, चत्वारः हस्ताः च अभवन् । तद् दृष्ट्वा हर्षितः कौलिकः गृहं प्रत्यागच्छत् । यदा स ग्रामं प्रापत्, तदा ग्रामीणाः अद्भुतं तं दृष्ट्वा ‘अयं राक्षसः’ इति मत्वा दण्डैः शिलाखण्डैः च प्राहरन् । मित्रवचनस्य अवहेलनेन तस्य कौलिकस्य प्राणाः गताः । अतः कथ्यते -

**यस्य नास्ति स्वयं प्रज्ञा मित्रोक्तं न करोति यः ।**
**स एव निधनं याति यथा मन्थरकौलिकः ॥**

**श्लोकः**

**पदच्छेदः**

यस्य, नास्ति, स्वयम्, प्रज्ञा, मित्रोक्तम्, न, करोति, यः, सः, एव, निधनम्, याति, यथा, मन्थरकौलिकः ।

**सरलार्थः**

यः 'किम् उचितम् अस्ति, किं च नास्ति' इति स्वयमेव विवेक्तुं न शक्नोति, हितचिन्तकानां मित्राणां वचनम् अपि न परिपालयति सः अवश्यं दुःखं प्राप्नोति, दुर्भाग्यवशाद् मृत्युं च अधिगन्तुं शक्नोति । कथायां स्वबुद्धिरहितः कौलिकः मित्रवचनम् अपरिपालयन् मृत्युं प्राप्तः ।

## अभ्यासः

### पाठानुशीलनम्

१. **शुद्धम् उच्चारयत**

**जीवनवृत्तिम्, उपकरणानि, कर्तितुम्, वस्त्रनिर्माणाय, बुभुक्षया, दानधर्मादिकम्, अनुभविष्यावः, अवहेल्य, शिलाखण्डैः ।**

२. **पाठस्य प्रथमम् अनुच्छेदं शुद्धं वाचयत ।**

३. **एकपदेन उत्तरयत**

(क) कौलिकस्य उपकरणानि कीदृशानि अभवन् ?

(ख) शिंशपावृक्षे कः वसति स्म ?

(ग) यक्षः कं निषेधन् अकथयत् ?

(घ) मार्गे कौलिकः कम् अपश्यत् ?

(ङ) कौलिकः कस्य वचनम् अपालयत् ?

(च) कौलिकस्य याचनानन्तरं यक्षः किम् अकथयत् ?

४. **एकवाक्येन उत्तरयत**

(क) कौलिकः उपकरणानि निर्मातुं किम् अकरोत् ?

(ख) कौलिकः किं कृत्वा उपकरणानि निर्मातुम् ऐच्छत् ?

(ग) नापितः कौलिकं किम् अकथयत् ?

(घ) कौलिकस्य भार्या किं किं याचितुम् अकथयत् ?

(ङ) यक्षस्य प्रतिवचनानन्तरं किम् अभवत् ?

(च) ग्रामीणाः कौलिकं किमर्थं दण्डैः शिलाखण्डैः च प्राहरन् ?

(ज) कीदृशः मनुष्यः निधनं याति ?

५. पाठस्य तृतीयानुच्छेदस्य श्रुतिलेखनं कुरुत ।

६. उदाहरणानुसारेण केन कस्मै कथितं लिखत

| कथनम् | केन | कस्मै |
|---|---|---|
| भो ! अयं वृक्षः मम वासः अस्ति । अतः इमं न कृन्त । | यक्षेण | कौलिकाय |

(क) तथास्तु ।

(ख) भो ! एवं मा कुरु ।

(ग) राज्ये प्राप्ते त्वं राजा भविष्यसि, अहं तव मन्त्री भविष्यामि ।

(घ) अहं भार्यां मित्रं च पृष्ट्वा आगत्य याचामि ।

(ङ) अतः अहम् इमं वृक्षं कर्तित्वा उपकरणानि निर्मामि ।

७. समीचीनकथने 'आम्', असमीचीनकथने च 'न' इति लिखत ।

(क) कौलिकस्य उपकरणानि समीचीनानि आसन् ।

(ख) यक्षः वृक्षे प्रतिवसति स्म ।

(ग) नापितः बुद्धिमान् आसीत् ।

(घ) कौलिकस्य भार्या चतुरा आसीत् ।

(ङ) यक्षः वरम् अददात् ।

(च) कौलिकः यक्षस्य वरेण धनलाभम् अकरोत् ।

८. अनुच्छेदं पठित्वा प्रश्नान् उत्तरयत



नेपालस्य पण्डितः दधिराममरासिनिः शिक्षासेवी आसीत् । स वाराणस्यां शिक्षां गृहीतवान् । ततः स्वगृहं प्रत्यागत्य स्वगृहप्राङ्गणे ग्रामीणान् छात्रान् अध्यापयितुम् आरब्धवान् । स स्वशिष्यं भूमिपतिं हरिहरगौतमम् आहूय विद्यालयस्य स्थापनार्थम् अनुरुद्धवान् । गौतमः जन्मभूमौ खिदिमग्रामे एव हरिहरसंस्कृतपाठशालां संस्थापितवान् । यतः पश्चिमनेपालस्य प्रायः सर्वे प्रदेशाः शिक्षायाः प्रकाशेन प्रकाशिताः ।

दधिरामस्य प्रेरणया गौतमः छात्राणां सौविध्याय वाराणस्याम् अपि हरिहरसंस्कृतमहाविद्यालयं संस्थापितवान् । अनेन ज्ञायते यद्, दधिरामः छात्रान् सदुपदेशेन नीतिं प्रदर्श्य सुन्दरं जीवनं यापितवान् ।

**प्रश्नाः**

(क) दधिराममरासिनिः कः आसीत् ?

(ख) दधिरामः कुत्र ग्रामीणान् छात्रान् अध्यापयितुम् आरब्धवान् ?

(ग) कः हरिहरसंस्कृतपाठशालां स्थापितवान् ?

(घ) हरिहरमहाविद्यालयः कुत्र संस्थापितः ?

(ङ) दधिरामः कथं जीवनं यापितवान् ?

९. **लघुकथां पठित्वा प्रश्नान् उत्तरयत**

पुरा एकस्मिन् तपोवने एक आश्रम आसीत् । आश्रमे एक ऋषिर्वसति स्म । तस्य नाम धौम्य आसीत् । आश्रमे सः छात्रान् पाठयति स्म । तत्राश्रमे धौम्याद् ऋषेः शिक्षां ग्रहीतुं दूरतोऽपि शिष्याः तत्र आगच्छन्ति स्म । सर्वेऽपि शिष्याः तत्रैव आश्रमे आवासीयरूपेण निवसन्ति स्म । तेषु शिष्येषु एक आसीद् आरुणिः । सः सौम्यो विनम्रः सरलहृदयश्चासीत् । एकदा ऋषिर्वर्षर्तौ आश्रमस्य क्षेत्रेषु जलप्रवाहं रोद्धुं प्रैषयत् । आरुणिः च गुरोराज्ञां स्वीकृत्य तथा कर्तुं क्षेत्रं प्रति प्रस्थितवान् । कृतेऽपि महति प्रयत्ने मृत्तिकया, पाषाणखण्डैः च जलप्रवाहो न निरुद्धः । तत आरुणिः स्वशरीरमेव तत्र क्षेत्रस्य कुल्याया मुखे जलप्रवाहे तिर्यक्कृत्य सुप्तवान् ।

सायङ्कालपर्यन्तमपि आश्रमे आरुणिम् अनागतं विज्ञाय धौम्यर्षिः शिष्यैः सह यदा क्षेत्रम् प्राप्नोत्, तदा आरुणिः पूर्वदशायां जलप्रवाहे सुप्त एव आसीत् । ततः शिष्यम् आरुणिम् उत्थाप्य तत्र जलप्रवाहे शयनस्य कारणम् अपृच्छत् । कारणं श्रुत्वा गुरुभक्त्या रहस्यं विज्ञाय सुप्रसन्नो धौम्य आरुणये शुभाशीर्वादान् प्रायच्छत्, हर्षाश्रूणि विमुञ्चन् गाढम् आलिङ्गत् च । गुरोः सकाशाद् आशीर्वादान् प्राप्तवान् । स एव आरुणिः पश्चाद् महान् सुविख्यातश्च विद्वान् अभवत् ।

**(अ) एकपदेन उत्तरयत**

(क) पुरा कुत्र आश्रम आसीत् ?

(ख) आश्रमे को वसति स्म ?

(ग) मुनिर्धौम्यः कैः सह क्षेत्रं प्राप्नोति ?

(घ) आश्रमे के आवासीयरूपेण निवसन्ति स्म ?

**(आ) एकवाक्येन उत्तरयत**

(क) आरुणिः कीदृश आसीत् ?

(ख) केन केन कुल्याया जलप्रवाहो न निरुद्धः ?

(ग) आरुणिः कुत्र सुप्तवान् ?

(घ) आरुणिः पश्चात् कीदृशो विद्वान् अभवत् ?

**८. शुद्धं कुरुत**

कास्टम्, निसेधन्, स्नुत्वा, ऊक्त्वा, आपतिस्यन्ति, बृत्तान्तम्, द्विगुनपरिमिताणि, राक्छेसः ।

**९. अधस्तनानि पदानि प्रयुज्य वाक्यानि रचयत**

जीवनवृत्तिम्, उपकरणानि, कर्तित्वा, बुभुक्षया, परामर्शम्, इहलोके, द्वे, सन्तुष्टः, प्रहारेण, प्रज्ञा ।

**१०. अधोलिखितां लघुकथां पठित्वा सारांशं लिखत**

एकस्मिन् ग्रामे द्वे मित्रे आस्ताम् । तयोः एकः चतुरः, बुद्धिमान् च आसीत् । अपरः अनधीतः बुद्धिहीनः आसीत् । एकदा मार्गे गच्छन् बुद्धिहीनः प्रकाशमानं शिलाखण्डम् इव वस्तु अपश्यत् । स तद् गृहीत्वा ग्रामम् अगच्छत्, चतुरं मित्रम् अदर्शयत् । चतुरः अकथयत्, "भो मित्र ! एषः मणिः अस्ति, गृहे एव रक्ष । तव समृद्धिः भविष्यति । कमपि न दर्शय ।" एतत् श्रुत्वा हर्षितमनाः स गृहम् आगत्य पुत्रान् पत्नी च मणिम् अदर्शयत् । तद् दृष्ट्वा लुब्धाः पुत्राः तस्य विक्रयणार्थं स्वपितरम् अकथयन् । सः अपि एतेन समृद्धिः एव भविष्यति इति मत्वा ग्रामीणान् आहूय क्रेतुम् अनुरोधम् अकरोत्, मणिं च अदर्शयत् । प्रदर्शनसमये एव एकः चौरः मणिं चोरयित्वा पलायितवान् । एतेन खिन्नमनाः सः अचिन्तयत्, "मम मित्रेण साधु उक्तम् । दुर्लभवस्तूनां संरक्षणं कर्तव्यम्, न तु प्रदर्शनं विक्रयणं वा ।"

**११. अधस्तनं गद्यांशं पठित्वा प्रदत्तान् प्रश्नान् उत्तरयत**

एका बालिका आसीत् । सा अनाथालये वसति स्म । अध्ययने सा चतुरा आसीत् । अनुशासनशीला सा अन्येषां सहयोगं करोति स्म । एकदा सा विद्यालयाद् अनाथालयम्

आगच्छन्ती आसीत् । एकः ज्येष्ठः नागरिकः मार्गस्य पारं गच्छन् आसीत् । तदा एकं बसयानं तस्मिन् एव मार्गे आगच्छद् आसीत् । तस्य अधिकः वेगः आसीत् । बालिका तद् दृष्ट्वा ज्येष्ठं नागरिकम् आकृष्य अरक्षत् । स तां प्रशंस्य तस्याः विषये अपृच्छत् । तस्य सन्ततयः नासन् । अतः स तादृशीं गुणवतीं बालिकां पुत्रीरूपेण स्वीकृतवान् ।

**प्रश्नाः**

(क) बालिका अध्ययने कीदृशी आसीत् ?

(ख) सा किं करोति स्म ?

(ग) ज्येष्ठः नागरिकः किं कुर्वन् आसीत् ?

(घ) बालिका ज्येष्ठं नागरिकं कथम् अरक्षत् ?

(ङ) ज्येष्ठः नागरिकः बालिका कथं स्वीकृतवान् ?

## व्यवहारानुशीलनम्

**१. विवेकार्थं विद्या आवश्यकी न वा ? स्वमतं प्रकटयत ।**

**२. सन्मित्रस्य लक्षणानि कानि भवन्ति ? कक्षायां विमृश्य सूची निर्मात, सूचनापट्टे च प्रकाशयत ।**

**३. समुचिते विकल्पे चिह्नं (√) दत्त**

(क) प्रातः कस्मिन् काले उत्तिष्ठसि ?

(अ) ब्रह्ममुहूर्ते (आ) भोजनसमये (इ) विद्यालयसमये

(ख) प्रातः उत्थाय कं स्मरसि ?

(अ) मित्रम् (आ) ईश्वरम् (इ) खेलनम्

(ग) प्रातः उत्थाय कं प्रणमसि ?

(अ) पितरौ (आ) अनुजम् (इ) अनुजाम्

(घ) प्रतिदिनं प्रातः किं करोषि ?

(अ) शयनम् (आ) नर्तनम् (इ) दन्तधावनम्

## पाठः १७

नीतिपद्यम्

# विवेकिता

शान्तितुल्यं तपो नास्ति न सन्तोषात्परं सुखम् ।
न तृष्णायाः परो व्याधिर्न च धर्मो दयासमः ॥
मनसा चिन्तितं कार्यं वाचा नैव प्रकाशयेत् ।
मन्त्रवद् रक्षितं गूढं कार्ये चापि नियोजयेत् ॥

दानेन पाणिर्न तु कङ्कणेन
स्नानेन शुद्धिर्न तु चन्दनेन ।
मानेन तृप्तिर्न तु भोजनेन
ज्ञानेन मुक्तिर्न तु मुण्डनेन ॥

**प्रथमः श्लोकः**

**पदच्छेदः**

शान्तितुल्यम्, तपः, न, अस्ति, न, सन्तोषात्, परम्, सुखम्, न, तृष्णायाः, परः, व्याधिः, न, च, धर्मः, दयासमः ।

**सरलार्थः**

शान्तेः आचरणम् एव तपश्चरणम् अस्ति । तस्माद् अधिकं तपः नास्ति । सन्तोषात् परं सुखं नास्ति । असन्तोषी दुःखी भवति । तृष्णातः अधिकः अन्यः रोगः न विद्यते । तृष्णया पीडितः सदैव रुग्णः भवति । दयाभावाद् अधिकः धर्मः नास्ति । दयाभावः एव परमः धर्मः वर्तते ।

***शिक्षणालोकः***

*सन्तोषविषयकान् श्लोकान् सङ्कलय्य अध्ययनार्थं छात्राः प्रेरयितव्याः ।*

**द्वितीयः श्लोकः**

**पदच्छेदः**

मनसा, चिन्तितम्, कार्यम्, वाचा, न, एव, प्रकाशयेत्, मन्त्रवद्, रक्षितम्, गूढम्, कार्ये, च, अपि, नियोजयेत् ।

**सरलार्थः**

जनः मनसा सङ्कल्पितं कार्यं कुत्रचिद् अपि न कथयेत् । यथा मन्त्राः गूढतया रक्ष्यन्ते, तथा एव सङ्कल्पं रक्षित्वा जनः कार्ये तं प्रकाशयेत् ।

**तृतीयः श्लोकः**

**पदच्छेदः**

दानेन, पाणिः, न, तु, कङ्कणेन, स्नानेन, शुद्धिः, न, तु, चन्दनेन, मानेन, तृप्तिः, न, तु, भोजनेन, ज्ञानेन, मुक्तिः, न, तु, मुण्डनेन ।

**सरलार्थः**

हस्तौ दानेन शोभितौ भवतः । कङ्कणादिभिः शृङ्गारवस्तुभिः हस्तयोः शोभा न वर्धते । शरीरं स्नानेन शुद्धं भवति, चन्दनेन शरीरस्य शुद्धिः न जायते । जनः सम्मानेन सन्तोषं प्राप्नोति, भोजनेन एव जनः सन्तुष्टः न भवति । ज्ञानेन एव जनः मुक्तिं प्राप्नोति, मुण्डनेन जनः मुक्तो न भवति ।

## अभ्यासः

### पाठानुशीलनम्

१. **शुद्धमुच्चारयत**

**शान्तितुल्यम्, तृष्णायाः, व्याधिः, चिन्तितम्, मन्त्रवद्, कङ्कणेन, शुद्धिः, मुक्तिः**

२. **पाठस्थान् श्लोकान् सस्वरं वाचयत ।**

३. **पाठस्थानां त्रयाणाम् एव श्लोकानाम् अनुलेखनं कुरुत ।**

४. **एकपदेन उत्तरयत**

(क) केन तुल्यं तपः नास्ति ?

(ख) सुखं केन प्राप्यते ?

(ग) केन सङ्कल्पः क्रियते ?

(घ) गूढं कथं रक्षितं भवति ?

(ङ) मुक्तिः केन प्राप्यते ?

५. **एकवाक्येन उत्तरयत**

(क) दयासमः कः नास्ति ?

(ख) व्याधिः कः ?

(ग) किं वाचा न प्रकाशनीयम् ?

(घ) केन पाणिः सुशोभते, केन च न ?

(ङ) शुद्ध्यर्थ किं कर्तव्यम् ?

६. **पदानि संशोधयत**

**ब्याधी, तिस्णायाः, बाचा, प्रकासयेत्, गुढम्, शुद्दिः, त्रिप्तिः, मुन्डनेन ।**

७. **समीचीनकथने 'आम्', असमीचीनकथने च 'न' इति लिखत**

(क) तृष्णातुल्यं सुखं नास्ति ।

(ख) सङ्कल्पः कार्ये नियोजनीयः ।

(ग) कङ्कणेन हस्तः शोभते ।

(घ) मुण्डनेन मुक्तिः भवति ।

८. **अधस्तनानि पदानि प्रयुज्य वाक्यानि रचयत**

**शान्तितुल्यम्, सन्तोषात्, व्याधिः, जीवनात्, दिने, स्नानेन, मुक्तिः ।**

९. **अनुच्छेदं पठित्वा उत्तराणि लिखत**

गुरुः छात्रान् पृच्छति, "घटं कः निर्माति ।" छात्राः उत्तरयन्ति, "घटं कुम्भकारः निर्माति ।" एवं क्रमेण वयं वक्तुं शक्नुमः यत् कविः काव्यं रचयति, जननी सन्ततिं जनयति, कृषकः धान्यम् उत्पादयति, रथी रथं चालयति इति । यदि कोऽपि अस्मान् पृच्छेत्, "जगत् कः रचयति, चालयति, पालयति, नाशयति ?" तदा वयं विचारशीला भवामः । तस्योत्तरं सरलं न भवेत् । एतद् जगत् कार्यमस्ति । कार्यं कारणस्य परिणामः मन्यते । जगतः कारणं किमिति

विषये विदुषां नैकमतं वर्तते । अत्र अस्माभिः विचारणा कर्तव्या । मानवाः अन्ये प्राणिनश्च जगत् निर्मातुं न क्षमाः । जगत् तेषां सृष्टिर्नास्ति प्रत्युत ते एव जगतः सृष्टिरूपाः वर्तन्ते । अत एतत् स्पष्टं भवति यद् जगतः कारणं परब्रह्म एव । परब्रह्म सर्वं स्रष्टुं शक्नोति परं न कोऽपि परब्रह्मणः सृष्ट्यै क्षमोऽस्ति । अत्र वादविवादः नोचित इति दार्शनिकानां सम्मतिः वर्तते ।

**प्रश्नाः**

(क) कः काव्यं रचयति ?

(ख) जगत् किमस्ति ?

(ग) के जगत् निर्मातुं क्षमाः न सन्ति ?

(घ) जगतः कारणं किम् ?

(ङ) परब्रह्म किं स्रष्टुं शक्नोति ?

(च) कुत्र वादविवादः उचितो न भवति ?

१०. **श्लोकान् पठित्वा स्वमतं वर्णयत**

**अष्टादशपुराणेषु व्यासस्य वचनद्वयम् ।**
**परोपकारः पुण्याय पापाय परपीडनम् ॥**

**सुखस्यानन्तरं दुःखं दुःखस्यानन्तरं सुखम् ।**
**सुखं दुःखं मनुष्याणां चक्रवत् परिवर्तते ॥**

**सर्वलक्षणहीनोऽपि यः सदाचारवान् भवेत् ।**
**श्रद्धधानोऽनसूयश्च शतं वर्षाणि जीवति ॥**

११. **कथांशं पठित्वा प्रश्नान् उत्तरयत**

एकदा राजकुमारः सिद्धार्थः विहारार्थम् उपवनं गतः । सहसा एकं क्रन्दनध्वनिं श्रुत्वा सः इतस्ततः अपश्यत् । बाणेन विद्धः एकः हंसः भूमौ पतितः आसीत् । एतद् दृष्ट्वा सिद्धार्थस्य चित्तं करुणया व्याकुलं जातम् । स धावित्वा हंसस्य शरीरात् बाणं निष्कास्य तम् अङ्के अधारयत् । अत्रान्तरे देवदत्तः धावन् तत्र प्राप्तः । सिद्धार्थस्य हस्ते हंसं दृष्ट्वा सः उच्चैः अवदत्, "सिद्धार्थ ! एषः मम हंसः । मया बाणेन निपातितः । अतः मह्यं देहि ।" सिद्धार्थः

दृढतया अवदत्, "अहं न दास्यामि । अहम् अस्य रक्षकः अस्मि ।" तदा तौ विवादं कुर्वन्तौ राजसभां गतौ । राजा सर्वं वृत्तान्तम् आकर्ण्य आदिशत्, "यस्य पार्श्वे हंसः आगमिष्यति, तस्यैव भविष्यति ।" हंसः सिद्धार्थस्य समीपं गतवान् । सत्यमिदम् -

**भक्षकाद् रक्षकः श्रेयान् ।**

**प्रश्नाः**

(क) कः भूमौ पतितः आसीत् ?

(ख) हंसः कस्य समीपं गतवान् ?

(ग) सिद्धार्थः किं कृत्वा हंसम् अङ्के अधारयत् ?

(घ) अस्याः कथायाः शीर्षकं किम् ?

**१२. अधस्तनस्य श्लोकस्य आधारेण शिक्षकस्य सहयोगेन सन्तोषविषये एकम् अनुच्छेदं लिखत**

**अन्तो नास्ति पिपासायाः सन्तोषं परमं सुखम् ।**
**तस्मात् सन्तोषमेवेह परं पश्यन्ति पण्डिताः ॥**

**१३. अधस्तनम् अनुच्छेदं पठित्वा धौम्यस्य विषये सखिभिः सह चर्चां कुरुत**

धौम्यः प्रसिद्धः ऋषिः आसीत् । सः ऋषेः अपोदस्य पुत्रः आसीत् । धौम्यस्य आश्रमः गङ्गायाः तटवर्तिनि उत्कोचकतीर्थे आसीत् । देवलस्य भ्राता धौम्यः पाण्डवानां पुरोहितः आसीत् । चित्ररथस्य आदेशेन युधिष्ठिरः धौम्यं पुरोहितं कृतवान् । द्रौपद्या सह पञ्चानां पाण्डवानां विवाहं धौम्यः एव अकारयत् । पाण्डवानां वनवासस्य द्वादशवर्षाणि यावत् धौम्यः तैः सहैव अतिष्ठत् । युधिष्ठिरः शरशय्यायां सुप्तं भीष्मं मेलितुं धौम्येन सह अगच्छत् । धौम्यस्य परामर्शेन युधिष्ठिरः सूर्यस्य उपासनाम् अकरोत् । उपासनया प्रसन्नः सूर्यः युधिष्ठिराय अक्षयपात्रम् अयच्छत् । सूर्यः अवदत्, "इदं पात्रं द्रौपद्यै देहि, अनेन तुभ्यं वनवासे अन्नस्य न्यूनत्वं न भविष्यति ।" वनवासे युधिष्ठिरः नद्याश्रम-पुण्यतपोवनानां विषये धौम्यम् अपृच्छत् । धौम्यः युधिष्ठिरस्य जिज्ञासां समदधात् । धौम्यः पूर्व-पश्चिमोत्तर-दक्षिणदिशां तपोवनानि तीर्थस्थलानि च अवर्णयत् । महाभारतस्य वनपर्वणः षडशीतितमात् अध्यायात् नवतितमम् अध्यायं यावद् एतद् वर्णितमस्ति । धौम्यर्षेः त्रयः गुरुभक्ताः शिष्याः आसन् - आरुणिः, उपमन्युः, वेदश्च । धौम्यः नारायणस्य परमभक्तः आसीत् । स कथयति, "यत्र परमात्मा सनातनः नारायणदेवः तिष्ठति तत्र सकलं जगत्, सर्वाणि तीर्थानि देवालयाश्च सन्ति ।"

यथा –

यत्र नारायणो देवः परमात्मा सनातनः ।

तत्र कृत्स्नं जगत् सर्वं तीर्थन्यायतनानि च ॥ (वनपर्व ९०।२८)

१४. **श्लोकस्य नेपालीभाषायाम् सरलार्थं लिखत**

**अकृत्वा परसन्तापम् अगत्वा खलमन्दिरम् ।**

**अक्लेशयित्वा चात्मानं यदल्पमपि तद्बहु ॥**

१५. **श्लोकं पठित्वा प्रश्नान् उत्तरयत**

**सर्पाः पिबन्ति पवनं न च दुर्बलास्ते**

**शुष्कैस्तृणैर्वनगजा बलिनो भवन्ति ।**

**कन्दैः फलैर्मुनिवराः क्षपयन्ति कालम्**

**सन्तोष एव पुरुषस्य परं निधानम् ॥**

**प्रश्नाः**

(क) सर्पाः किं पिबन्ति ?

(ख) वनगजाः शुष्कैः तृणैः अपि कीदृशाः भवन्ति ?

(ग) मुनिवराः कैः कालं क्षपयन्ति ?

(घ) पुरुषस्य परं निधानं किम् अस्ति ?

## व्यवहारानुशीलनम्

१. **सन्तोषेण जनाः कथं सुखिनो भवन्ति ? कक्षायां विमृशत ।**

२. **असन्तोषस्य कारणेन आत्मना प्राप्तं दुःखं श्रावयत ।**

३. **सन्तोषस्य लाभं दृष्ट्वा असन्तोषस्य हानिं लिखत**

| सन्तोषस्य लाभः | असन्तोषस्य हानिः |
|---|---|
| चिन्ता न भवति । | ---------------------- |
| शरीरं स्वस्थं भवति । | ---------------------- |
| तृष्णा न जायते । | ---------------------- |
| मनः स्थिरं भवति । | ---------------------- |
| क्रोधः न समुत्पद्यते । | ---------------------- |


## पाठः १८

प्रबन्धः

# दीनसेवा

सर्वे जनाः सुखं शान्तिं च कामयन्ते । सुखस्य शान्तेः च अन्वेषणाय केचन तीर्थयात्रां कुर्वन्ति, केचन च देशाटनं विदधति । अपरे मानवाः समाजसेवया शान्तिः लभ्यते इति विश्वसन्ति । आत्मशान्त्यै क्रियमाणेषु अनेकेषु कर्मसु दीनसेवा सर्वोत्तमा मन्यते । दीनानां सेवया यादृशी शान्तिः लभ्यते तादृशी न कैश्चन अन्यैः कर्मभिः लब्धुं शक्यते इति साधवः उपदिशन्ति ।

अस्माकं समाजे सर्वे मानवाः स्वस्थाः, सबलाः च न भवन्ति । समाजे रोगिणः, दुर्बलाः, निर्धनाः च मानवाः निवसन्ति । येषां शरीरे बलं न भवति, ते सरलतया कार्याणि कर्तुं न शक्नुवन्ति । येषां पार्श्वे धनं नास्ति, ते च जीविकायै आवश्यकानि वस्तूनि समये न लभन्ते । विविधाभिः समस्याभिः ग्रस्ताः ते दीनाः बुभुक्षिताः पिपासिताः च भवन्ति । अनन्तरं दुःखसागरे मज्जन्ति । दुर्जनाः तादृशानां जनानां परिहासं कुर्वन्ति, किन्तु सज्जनैः तेषामुपकारो विधेयः । 'परोपकारः पुण्याय पापाय परपीडनम्' इति वाक्यं स्मारं स्मारं सर्वैः दीनसेवा विधेया ।



*शिक्षणालोकः*

*सन्तोषविषयकान् श्लोकान् सङ्कलय्य अध्ययनार्थं छात्राः प्रेरयितव्याः ।*

तीर्थयात्रायै, देशाटनाय, समाजसेवायै च बहुधनेन साकं समयः च आवश्यको भवति । किन्तु दीनानां सेवायै न तथा किमपि अधिकम् अपेक्षितं भवति । दीनसेवायै तु केवलम् अस्माकं हृदि करुणा अपेक्ष्यते । कस्मैचन बुभुक्षिताय यदि भोजनं दीयते तर्हि स प्रसन्नः सन् अस्मान् आशीर्भिः अभिनन्दति । पिपासिताय कस्मैचन यदि जलं दीयते तर्हि स कृतकृत्यः भवति । दीनसेवायै अस्माभिः कश्चन महान् सङ्कल्पः अपि नैव विधेयः । यात्रासमये यानादिषु, विद्यालयगमनकाले, कार्यालयगमनसमये वा मार्गेषु च यत्र-कुत्रचन अशक्ताः, दुर्बलाः, याचकाः, दीनाः च जनाः प्रतिदिनं दृश्यन्ते । अतः तादृशान् दीनान् दृष्ट्वा एव सहसा तेषां सेवायै यतनीयम् । तान् दृष्ट्वा अपि तेषां सेवायै यः न प्रयतते सः सज्जनः न उच्यते । दृष्टिविहीनान्, अङ्गविकलान्, अनाथान् वा दृष्ट्वा अनायासेन तेषां सहायता कर्तव्या ।

आधुनिके समाजे सर्वे मानवतायाः मानवाधिकारस्य च विषये चर्चां कुर्वन्ति । मानवतायाः संरक्षणाय गोष्ठ्यः आयोजिताः भवन्ति । किन्तु मानवता सम्भाषणादिना न, संस्कारेण विकसिता भवति । परस्परं साहाय्यार्थम् एव समाजः आवश्यको भवति । समाजे सर्वे मानवाः यदि दीनसेवारताः स्युः, तर्हि समाजे शान्तिः विकसिता भवति । समाजे शान्ते सति राष्ट्रशान्तिः, विश्वशान्तिश्च सम्भवति । विश्वशान्तेः मार्गदर्शकः गौतमबुद्धः अपि दीनसेवायै जनान् प्रेरयामास । महाकविः लक्ष्मीप्रसादः अपि कवितासु बहुत्र सेवया मनुजो महान् भवतीति उद्घोषयामास ।

वयं जन्मदिवसे, विवाहोत्सवे, अन्येषु च विशेषेषु अवसरेषु बहु धनं व्ययीकृत्य उत्सवं कुर्मः । वस्तुतः तादृशः उत्सवः धनस्य दुरुपयोगः एव अस्ति । तेनैव धनेन यदि निर्धनानाम्, अनाथानां च सेवां कुर्मः, तर्हि ते प्रसन्नाः भवन्ति, अस्माकं हृदये अपि शान्तिः भवति । दीनानां सेवा मानवानां प्रमुखं कर्तव्यम् अस्ति इति सर्वदा स्मरणीयम् । स्वस्य परिवारे, समाजे च दीनसेवायाः परम्परा संवर्धनीया ।

## अभ्यासः

### पाठानुशीलनम्

१. **पाठस्य सर्वान् अनुच्छेदान् क्रमेण वाचयत ।**

२. **शुद्धम् उच्चारयत**

**अन्वेषणाय, बुभुक्षिताः, अङ्गविकलान्, उद्घोषयति, व्ययीकृत्य**

३. **समुचितानि पदानि विन्यस्य रिक्तस्थानानि पूरयत**

(क) दुर्जनाः दीनानाम् ........ कुर्वन्ति । (परिहासम्, सहयोगम्)

(ख) परोपकारः पुण्याय .......... परपीडनम् । (पापाय, धर्माय)

(ग) सज्जनैः दीनानाम्.......... विधेयः । (उपकारः, तिरस्कारः)

(घ) दीनान् दृष्ट्वा एव तेषां .......... यतनीयम् । (सेवायै, निन्दायै)

(ङ) परस्परं .......... एव समाजः आवश्यको भवति । (साहाय्यार्थम्, कलहार्थम्)

४. **अधस्तनानां प्रश्नानाम् उत्तराणि सङ्क्षेपेण लिखत**

(क) जनाः सुखस्य शान्तेश्च अन्वेषणाय किं कुर्वन्ति ?

(ख) दीनानां सेवायै किम् अपेक्षितं भवति ?

(ग) कीदृशः जनः सज्जनः न उच्यते ?

(घ) शान्तिः कथं विकसिता भवति ?

(ङ) महाकविः लक्ष्मीप्रसादः किम् उद्घोषयामास ?

५. **दीनसेवया अस्माकं हृदये शान्तिः उद्भवति इति विषये सरलभाषया अनुच्छेदमेकं रचयत ।**

६. **लघुकथां पठित्वा प्रश्नान् उत्तरयत**

ग्रामस्य निकटे एका नदी आसीत् । एकदा एकः लुब्धः शुनकः तस्याः तटम् अगच्छत् । शुनकस्य मुखे एकः अस्थिखण्डः आसीत् । स नद्याः जलप्रवाहे स्वस्य प्रतिविम्बम् अपश्यत् । तदा स अचिन्तयत्, "अपरस्य शुनकस्य मुखे अपि अस्थिखण्डः अस्ति । अहम् अस्माद् अस्थिखण्डम् अपहरामि" इति । ततः स जले दृष्टस्य शुनकस्य मुखाद् अस्थिखण्डम् अपहर्तुं स्वमुखं विस्फारितवान् । एतेन तस्य मुखस्थः अस्थिखण्डः अपि नदीजले अपतत् । स निराशः भूत्वा ग्रामं प्रत्यागच्छत् । अतिलोभस्य परिणामः केवलं हानिः भवति न तु लाभः ।

(अ) **एकपदेन उत्तरयत**

(क) शुनकस्य मुखे किम् आसीत् ?

(ख) हानिः कस्य परिणामः ?

(आ) **पूर्णवाक्येन उत्तरयत**

(क) नदी कुत्र आसीत् ?

(ख) जले अस्थिखण्डस्य पतनानन्तरं शुनकः किम् अकरोत् ?

**७. अधस्तनानि असत्यवाक्यानि सत्यानि विधाय पुस्तिकायां लिखत**

(क) सर्वे जनाः दुःखं रोगञ्च कामयन्ते ।

(ख) बलहीनाः सरलतया कार्यं कर्तुं शक्नुवन्ति ।

(ग) जलदानेन पिपासितः क्रुद्धो भवति ।

(घ) गौतमबुद्धः परनिन्दायै जनान् प्रेरयामास ।

(ङ) दीनानां सेवा मानवानां प्रमुखं कर्तव्यं नास्ति ।

**८. अधस्तनानि पदानि शुद्धानि कृत्वा लिखत**

**तिर्थयात्रायै, पिपाषिताय, सम्भाशणादिना, विश्वसान्तिः, लक्ष्मिप्रसादः, उद्घोषयामाश, स्मरणियम् ।**

**९. निम्नाङ्कितपदानि प्रयुज्य वाक्यानि रचयत**

**साधवः, दीनाः, परोपकारः, कृतकृत्या, यतनीयम्, दुरुपयोगः, अनाथानाम्**

**१०. अधोलिखितं गद्यांशं पठित्वा उत्तरं दत्त**

आत्मनो विश्वास एव आत्मविश्वासो वर्तते । आत्मविश्वासी जनः स्वस्वकृतं कार्यं प्रति सदा गौरवम् अनुभवति । तेन सद्विचारः प्रतिपदं वर्धते । स एव जीवनमार्गे स्वलक्ष्यं प्राप्तुं समर्थो भवति । मनुष्यजीवने विभिन्नाः समस्या आपतन्ति । तासां निराकरणं साधारणमनुष्यस्य वशे नास्ति परन्तु आत्मविश्वासी गजचरणेभ्यः स्वशरीरम्, ग्राहमुखात् स्वपादं च रक्षितुं शक्नोति । सामान्यो जनः अन्येषां दुर्व्यवहारात् खिन्नतां प्राप्नोति । ततः तस्य मनः कार्याद् निवर्तते परन्तु आत्मविश्वासी समस्याभ्यः न कम्पते । अतः जीवनसाफल्याय आत्मविश्वासो कर्तव्यः ।

**प्रश्नाः**

(क) आत्मविश्वासी किम् अनुभवति ?

(ख) किं साधारणमनुष्यस्य वशे नास्ति ?

(ग) आत्मविश्वासी ग्राहमुखात् किं रक्षति ?

(घ) कस्य मनः कार्याद् निवर्तते ?

(ङ) जीवने सफलतां प्राप्तुं किं कर्तव्यम् ?

११. **अधस्तनं पद्यं पठित्वा शिक्षकस्य साहाय्येन तात्पर्यं लिखत**

**हीनाङ्गान् अतिरिक्ताङ्गान् विद्याहीनान् विगर्हितान् ।**
**रूपद्रविणहीनान् च सत्त्वहीनान् च नाक्षिपेत् ॥**

१२. **अनुच्छेदं पठित्वा प्रश्नान् उत्तरयत**

समाजस्य सेवा समाजसेवा कथ्यते । समाजे स्थितानां जनानां विकासाय कृतं कार्यम् एव समाजसेवा भवति । यः स्वार्थं त्यक्त्वा जनानाम् उन्नतये प्रयतते, स समाजसेवी कथ्यते । अधुना जनाः स्वार्थवशात् समाजसेविनः भवितुम् इच्छन्ति । अद्य दम्भं प्रदर्शयितुं नामप्रसाराय च जनाः समाजसेवायां संलग्नाः सन्ति । इदानीं समाजसेवार्थं जनः यावत् कार्यं करोति, ततः अपि अधिकं स्वस्य सम्मानम् इच्छति । परम् एतादृशी समाजसेवा व्यर्था भवति । समाजसेवा तु निःस्वार्था अपेक्ष्यते ।

**प्रश्नाः**

(क) का समाजसेवा कथ्यते ?
(ख) कः समाजसेवी कथ्यते ?
(ग) अद्य किमर्थं जनाः समाजसेवायां संलग्नाः सन्ति ?
(घ) जनः किम् इच्छति ?
(ङ) समाजसेवा कीदृशी अपेक्ष्यते ?

## व्यवहारानुशीलनम्

१. **पिता दीनसेवां कर्तुम् इच्छति । त्वं पितुः सहयोगं कथं करोषि ?**

२. **कस्यचिद् दीनस्य दीनतायाः कारणम् अन्विष्य त्वं कथं तस्य निराकरणे प्रयतसे ? लिख ।**

३. **त्वम् एतेषां प्रयोजनं किं मन्यसे ? लिख**

अनाथालयः

वृद्धाश्रमः

धर्मशाला

चिकित्सालयः

प्रतीक्षालयः

आलिन्दः

आचारपद्यम्

# पण्डितलक्षणम्

निषेवते प्रशस्तानि निन्दितानि न सेवते ।
अनास्तिकः श्रद्दधान एतत् पण्डितलक्षणम् ॥
न हृष्यत्यात्मसम्माने नावमानेन तप्यते ।
गाङ्गो ह्रद इवाक्षोभ्यो यः स पण्डित उच्यते ॥
विद्याविनयसम्पन्ने ब्राह्मणे गवि हस्तिनि ।
शुनि चैव श्वपाके च पण्डिताः समदर्शिनः ॥

**प्रथमः श्लोकः**

**पदच्छेदः**

निषेवते, प्रशस्तानि, निन्दितानि, न, सेवते, अनास्तिकः, श्रद्दधानः, एतत्, पण्डितलक्षणम् ।

**सरलार्थः**

यः शास्त्रैः समर्थितानां वस्तूनां सेवनं करोति, निन्दितानां, निषिद्धानां च वस्तूनां सेवनं न करोति, यः आस्तिकः अस्ति, यः श्रद्धायुक्तः अस्ति, सः एव पण्डितः भवति । एतद् एव पण्डितस्य लक्षणम् अस्ति ।

**द्वितीयः श्लोकः**

**पदच्छेदः**

न, हृष्यति, आत्मसम्माने, न, अवमानेन, तप्यते, गाङ्गः, ह्रदः, इव, अक्षोभ्यः, यः, सः, पण्डितः, उच्यते ।

***शिक्षणालोकः***

*महापुरुषाणां कथां श्रावयित्वा सदाचरणे छात्राः सचेष्टाः कर्तव्याः ।*

**सरलार्थः**

यः मनुष्यः सम्मानं प्राप्य उन्मत्तः न भवति, कश्चिद् अपमानं करोति चेदपि चिन्तितः, दुःखितः वा न भवति, गङ्गायाः ह्रद इव सर्वदा समभावे वर्तमानः स एव पण्डितः कथ्यते ।

**तृतीयः श्लोकः**

**पदच्छेदः**

विद्याविनयसम्पन्ने, ब्राह्मणे, गवि, हस्तिनि, शुनि, च, एव, श्वपाके, च, पण्डिताः, समदर्शिनः ।

**सरलार्थः**

पण्डिताः सर्वेषु प्राणिषु समानरूपेण व्यवहारं कुर्वन्ति । विद्यया, विनयेन च युक्तः ब्राह्मणः, लक्ष्मीरूपेण पूज्या गौः, विशालेन शरीरेण युक्तः हस्ती, कुक्कुरः, चाण्डालः, एतेषु सर्वेषु ते भेदं न पश्यन्ति, एतान् सर्वान् समभावेन पश्यन्ति ।

## अभ्यासः

### पाठानुशीलनम्

**१. शिक्षकात् श्रुत्वा श्लोकानां सस्वरवाचनं कुरुत ।**

**२. एकपदेन उत्तरयत**

(क) कः प्रशस्तानि निषेवते ?

(ख) पण्डितः निन्दितानि किं कुरुते ?

(ग) पण्डितः कस्मिन् न हृष्यति ?

(घ) सर्वेषु प्राणिषु पण्डिताः कथं व्यवहरन्ति ?

(ङ) ब्राह्मणे, चाण्डाले च कस्य समभावः वर्तते ?

**३. एकवाक्येन उत्तरयत**

(क) पण्डितः किं करोति, किं च न करोति ?

(ख) पण्डितः कीदृशः भवति ?

(ग) पण्डितः कदा न हृष्यति, कदा च चिन्तितः न भवति ?

(घ) कीदृशः मनुष्यः पण्डितः कथ्यते ?

(ङ) केषु पण्डिताः समदर्शिनः सन्ति ?

**४. श्लोकक्रमस्य समन्वयं कुरुत**

| | |
|---|---|
| अनास्तिकः श्रद्धधानः | नावमानेन तप्यते |
| न हृष्यत्यात्मसम्माने | यः स पण्डित उच्यते |
| विद्याविनयसम्पन्ने | एतत् पण्डितलक्षणम् |
| गाङ्गो ह्रद इवाक्षोभ्यो | कर्ता पण्डित उच्यते |
| | ब्राह्मणे गवि हस्तिनि |

**५. उचितपदेन रिक्तस्थानं पूरयत**

**आस्तिकः, अवमानेन, प्रशस्तानि, गौः, व्यवहर्तव्या**

(क) पण्डितः ............ निषेवते ।

(ख) पण्डितः ............ भवति ।

(ग) ............ पण्डितः चिन्तितः न भवति ।

(घ) सर्वेषु समानतया .............. ।

(ङ) .............. लक्ष्मीरूपेण पूज्या अस्ति ।

**६. श्रुतिलेखनं कुरुत**

**न हृष्यत्यात्मसम्माने नावमानेन तप्यते ।**
**गाङ्गो ह्रद इवाक्षोभ्यो यः स पण्डित उच्यते ॥**

**७. कथांशं पठित्वा एकपदेन प्रश्नान् उत्तरयत**

स आह, "अहं गङ्गदत्तो नाम मण्डूकाधिपतिः त्वत्सकाशे मैत्र्यर्थम् अभ्यागतः ।" तच्छ्रुत्वा सर्प आह, "भो, अश्रद्धेयम् एतद् यत् तृणानां वह्निना सह सङ्गमः ।" गङ्गदत्त आह, "भोः, सत्यम् एतत् । स्वभाववैरी त्वम् अस्माकं परं परपरिभावात् प्राप्तोऽहं ते सकाशम् ।" सर्प आह, "कथय, कस्मात् परिभवः ?" स आह, "दायादेभ्यः ।" सोऽप्याह, "क्व ते आश्रयः- वाप्याम्, कूपे, तडागे, ह्रदे वा ? तत् कथय स्वाश्रयम् ।" तेन उक्तम्, "पाषाणचयनिबद्धे कूपे ।"

**प्रश्नाः**

(क) गङ्गदत्तः सर्पस्य सकाशं किमर्थं गतवान् ?

(ख) मण्डूकस्य परिभवः कस्मात् आसीत् ?

(ग) तृणानां केन सह सङ्गमः अनुचितः ?

(घ) मण्डूकाधिपतेः नाम किम् आसीत् ?

(ङ) मण्डूकस्य आश्रयः कुत्र नासीत् ?

**८. समीचीनकथने 'आम्', असमीचीनकथने 'न' इति लिखत ।**

(क) शास्त्रैः निन्दितानां सेवनं कर्तव्यम् ।

(ख) पण्डितः आस्तिकः भवति ।

(ग) कस्यचन अवमानेन चिन्ता कर्तव्या ।

(घ) पशुषु, मानवेषु च समभावः आवश्यकः ।

(ङ) पण्डितस्य व्यवहारः अनुकरणीयः अस्ति ।

**९. अधस्तनीं लघुकथां पठित्वा प्रश्नोत्तराणि लिखत**

वने एको भिक्षुकः वसति । सः प्रतिदिनं भिक्षायै नगरं गच्छति । एकदा एका महिला तस्मै विषाक्तां रोटिकां यच्छति । स तां रोटिकां कुटीरं नयति । मध्याह्ने एको बालकः वने सूर्यस्य तापेन मूर्च्छितो भवति । स भिक्षुकः चिन्तयति - असौ बालकः क्षुधापीडितः अस्ति । भिक्षुकः बालकाय रोटिकां यच्छति । स तस्मै जलमपि यच्छति । स बालकः जलं पिबति, रोटिकां च खादति । यदा स रोटिकां खादति तदा एव प्राणान् त्यजति । तदा तस्य माता आगच्छति । तस्य माता तु सा एव महिला भवति या तस्मै भिक्षुकाय रोटिकां यच्छति । जनाः सत्यं कथयन्ति - "यथा कर्म तथा फलम् ।"

**प्रश्नाः**

(क) वने कः वसति ?

(ख) महिला विषाक्तां रोटिकां कस्मै यच्छति ?

(ग) तां रोटिकां कः खादति ?

(घ) प्राणान् कः त्यजति ?

(ङ) जनाः किं कथयन्ति ?

**१०. सरलार्थं कथयत**

**निषेवते प्रशस्तानि निन्दितानि न सेवते ।**
**अनास्तिकः श्रद्धधान एतत् पण्डितलक्षणम् ॥**

**११. अधस्तनानि पदानि प्रयुज्य वाक्यानि रचयत**

**सेवते, अनास्तिकः, आत्मसम्माने, पण्डितः, हस्ती, समदर्शिनः ।**

**१२. अधस्तनं श्लोकं पठित्वा प्रदत्तान् प्रश्नान् उत्तरयत**

**दरिद्रता धीरतया विराजते**
**कुवस्त्रता शुभ्रतया विराजते ।**
**कदन्नता चोष्णतया विराजते**
**कुरूपता शीलतया विराजते ॥**

(क) दरिद्रता कथं विराजते ?

(ख) शुभ्रतया कस्य शोभा भवति ?

(ग) उष्णतया किं विराजते ?

(घ) शीलेन कस्य शोभा वर्धते ?

**१३. समानार्थकान् श्लोकांशान् कथयत**

(क) शास्त्रविहितम् आचरणीयम् ।

(ख) वेदे, ईश्वरे च विश्वासः कर्तव्यः ।

(ग) विद्वांसः सर्वान् समानतया पश्यन्ति ।

(घ) आस्तिकाः श्रद्धायुक्ताः च मानवाः पण्डिताः कथ्यन्ते ।

**१४. अधोलिखितं पद्यमाश्रित्य एकम् अनुच्छेदं लिखत**

**मातृवत्परदारेषु परद्रव्येषु लोष्ठवत् ।**
**आत्मवत्सर्वभूतेषु यः पश्यति स पण्डितः ॥**

**१५. सस्वरवाचनं कुरुत**

सदाचारस्य महत्त्वं शास्त्रेषु वर्णितम् अस्ति । यः सदाचारं पालयति स गुणी नीतिमान् च

भवति । सदाचारः मानवानां कल्याणकारी मार्गः अस्ति । सदाचारिजनस्य सर्वत्र प्रशंसा भवति । सदाचारेण हीनः जनः कुत्रापि प्रतिष्ठां न लभते । सः सर्वत्र निन्दितो भवति । सदाचारः मानवधर्म एव कथ्यते । अत एव उक्तम् - "आचारः परमो धर्मः" ।

## व्यवहारानुशीलनम्

**१. त्वं कीदृशं जनं पण्डितं मन्यसे ?**

**२. प्रस्तुतं पाठं पठित्वा व्यवहारे कीदृशं परिवर्तनं करोषि ? सूचीनिर्माणं कुरु ।**

**३. समुचिते विकल्पे चिह्नं (√) दत्त**

(क) मित्राणि कलहं कुर्वन्ति चेत् त्वं किं करोषि ?

(अ) कलहे सम्मिलितः भवामि । (आ) कलहं शमयितुं प्रयते ।

(इ) सर्वाणि ताडयामि ।

(ख) रूप्यकाणि न सन्ति परं बुभुक्षितः असि चेत् किं करोषि ?

(अ) चोरयामि । (आ) याचामि ।

(इ) सेवया अर्जयामि ।

(ग) मण्डले गायनस्य प्रतियोगिता आसीत् । त्वं तत्र प्रथमः भविष्यसि चेत् मित्राणां पुरः किं करोषि ?

(अ) अभिमानं प्रदर्शयामि । (आ) उत्साहवर्धनाय धन्यवादं प्रकटयामि ।

(इ) गर्वेण नृत्यामि ।

(घ) विपन्नेन अपरिचितेन सह कथं व्यवहरसि ?

(अ) सादरं व्यवहरामि । (आ) सघृणं व्यवहरामि ।

(इ) यथाशक्ति साहाय्यं करोमि ।